
001195



१कं श्री चामराजेन्द्र संस्कृत महापाठशाला पुस्तकभाण्डागार
य खादरं समर्पितम्
K. Narasimhachar
9.11.1934

श्रीः

286

SOWDÂMANI

AND

KIRÂTÂRJUNEEYA SANGRAHA

BY

K. NARASIMHACHARYA

Sahitya Vidwan and Siromani

Teacher, Sri Chamarajendra Sanskrit College,

BANGALORE

SRI CHAMARAJENDRA SANSKRIT COLLEGE LIBRARY
F 232
वाणीं भजत गैर्वाणीं
ACC. 2715
FORT, BANGALORE.

कोटीश्वर-नरसिंहाचार्यविरचिता

सौदामनी

किरातार्जुनीयसङ्ग्रहश्च

2433
D-2
P-

(*All Rights Reserved*)

ಹೆಚ್ಚುವಿಕೆ ಸಂಖ್ಯೆ.....

B. B. D. POWER PRESS

BANGALORE CITY

1934

PRICE 10 ANNAS

K. NARASIMHA CHAR...
NO.....

Copies can be had from :—

K. NARASIMHACHARYA

55. SECOND CROSS ROAD, BASAVANGUDI P.O.

BANGALORE

All Rights Reserved.

अस्य ग्रन्थस्य सर्वेऽधिकाराः राजकीयनियमानुसारेण
ग्रन्थकर्त्रा स्वायत्तीकृताः

श्रीः

विज्ञापना



विदितचरमिदं सर्वेषां विदुषां गीर्वाणवाणीप्रणयिनां, यत्संस्कृत-
ाषायां आधुनिकनागरकजनरञ्जनचणाः कल्पितकथापरिकर्मिताः सु-
लितपदगुम्भिताः गद्यप्रबन्धाः विरला इति । अन्यभाषासु तु श्रान्तस्य,
ार्यगौरवोद्वेजितस्य वाऽऽह्लादोत्पादननिपुणाः ईदृशप्रबन्धाः बहुश उप-
ब्भ्यन्ते । तत्साम्प्रतं संस्कृतभाषायामपि तादृशनिबन्धा आवश्यका इति
न्यमानेन मया यथोचितं ललितशब्दप्रयोगेणेयमष्टपरिच्छेदात्मिका
गौदामनी व्यरचि । मया कल्पितोऽस्याश्चेतिवृत्तभागस्सहृदयेभ्य आनन्द-
न्दोहं सन्ददीत न वेति कातरं मे चेतः । परन्तु महाकवेः श्रीभारवेः
कश्चित्पद्यैर्योजितोऽयं ग्रन्थः सुमसूत्रन्यायेन शोभेततराम् । बहुतरा-
तरायैरत्र समापतितानि स्खलितानि पूज्यपाठकाः क्षमन्तामिति वार-
ारमभ्यर्थये । इतोऽपि भाषादिविषये व्यत्ययमावश्यकमभिसन्दधानाः
ान्यसहृदयाः यदि मां बोधयेयुः तदा पुनर्मुद्रणावसरे तान् समीकरि-
यामि । अस्याः शोधनकार्ये कृतसाहाय्यानामस्मद्देशिकानां तत्रभवतां
श्रीरामनाथपुर-देशिकाचार्यमहाशयानां, महाविदुषां श्रीकन्नम्बाडि-
गोपालकृष्णशास्त्रिमहाशयानां च कृते चिरं ऋणीभवामि ।


बेङ्गळूरु
१-३-१९३४

इति महतां साहाय्याकाङ्क्षी विपश्चितामनुचरश्च
कोटीश्वर-नरसिंहाचार्यः
श्रीचामराजेन्द्रसंस्कृतमहापाठशालासाहित्योपाध्यायः

श्रीः

SOME APPRICIATIONS

एतद्ग्रन्थविषये विदुषां अभिप्रायाः



पण्डितश्रीकोटीश्वर-नरसिंहाचार्येण प्रणीतं सौदामनीनामानं ग्रन्थं लोकयम् । संस्कृतभाषायां गद्यग्रन्थवैरल्यप्रवादं परिशील्य प्राचीन-ोमविहाय नवीननागरकरञ्जनपरिपाट्या प्रणीतोऽनतिविस्तारोऽयं न्धो निस्संशयं रसिकजनहृदयं परितोषयति । प्रौढकलाशाला-ार्थिनस्त्वेनं ग्रन्थमधीत्य ज्ञानमर्जयित्वा स्वयमीदृशग्रन्थरचनायां र्था भवेयुरिति विश्वसिमि । अतः शिक्षणशाखाप्रधानाध्यक्षा एनं न्थमवलोक्य सकलपुस्तकभाण्डागारेषु स्थापयित्वा प्रोत्साहयेयुरिति ामि ।

सूर पुरी
-१-१९३४

के. गोपालकृष्णशास्त्री,
आस्थानमहाविद्वान्,
महीशूरसंस्कृतमहापाठशालासाहित्यप्रधानोपाध्यायश्च

श्रीः

विदुषा वेदमूर्ति-कोटीश्वर-नरसिंहाचार्येण रचितां सौदामनीनाम्नीं नकृतिं आमूलाग्रं पर्यशीलयम् । प्राचीनरीतिमनपहाय नवीनरीत्या

प्रणीता, यथानुरूप्यं सुलभपदगुम्भिता रसस्राविणी कृतिरियं नूनं सहृदयहृदयमावर्जयतीति मन्ये । अस्याः कथाभागः परां नीतिं बोधयन्, उत्तरोत्तरं वाचकानां मनांस्याकर्षन् तेषां परमानन्दमादधाति । अस्मिकाले संस्कृतभाषाध्येतृणां एतादृशग्रन्थः अतीवावश्यकः । अनया योजितश्च किरातार्जुनीयसङ्ग्रहः उत्कृष्टैः पद्यैर्विराजते। अत एवायं प्रबन्धः प्रौढकलाशालायां S. S. L. C. प्रभृतिकक्ष्याणां, अखिलसंस्कृतपाठशालानां प्राथमिकादिकक्ष्याणां च पठ्यपुस्तकं भवितुं, समस्तानि शिक्षणशाखापुस्तकभाण्डागाराण्यलङ्कर्तुं चातिवेलमर्हतीति सुदृढं विश्वसिमि ।

बेंङ्गळूरु सिटि
५–३–१९३४

रामनाथपुरं-देशिकाचार्यः
श्रीचामराजेन्द्रसंस्कृतमहापाठशाला
साहित्यप्रधानोपाध्यायः, आस्थानविद्वांश्च

.....

I have read the book and I find it written in easy, flowing and correct style. The reader comes across some out-of-the-way idioms in it which are, doubtless, due to the character of the incidents chosen for narration.

.....

Mysore,
20—I—1934

M. HIRIYANNA,
Retired Sanskrit Professor,
University of Mysore.

॥ श्रीः ॥

॥ श्रीहयग्रीवाय नमः ॥

॥ श्रीगुरुभ्यो नमः ॥

सौ दा म नी

प्रथमः परिच्छेदः

श्रीशं शयानं भुजगेन्द्रतल्पे कल्पान्तकाले जठरान्तराले ।
स्वस्याद्भुते जीवगणानगण्यान् संवासयन्तं प्रणमाम्यनन्तम् ॥ १ ॥

गुरून्विद्योपदेष्टॄंश्च नत्वा सादरमञ्जसा ।
कुर्वे सौदामनीं रम्यां नवनागरकार्थिनीम् ॥ २ ॥

नाऽहं कविर्न च तथाऽखिलशास्त्रवेत्ता
काव्यस्य मर्म विपुलं न च वेद्मि किञ्चित् ।
कौतूहलेन तु मया रचितं प्रबन्धं
सम्मानयन्त्विह बुधा गुणमात्रलुब्धाः ॥ ३ ॥

अहो ! भगवान्भानुमान्सर्वतस्सरोरुहाणि विकासयन् स्वकिरणान् सफलयति । ध्वान्तसन्दोह आत्मनि सन्दिहानः, स्तेन इव गेहेषु स्वशरणाय विविक्तदेशमन्विष्यति । मृगाङ्कस्तेजस्विनामपरोक्षं सकलङ्कानां स्वास्यप्रदर्शनं विशेषतो लज्जायै भवतीति शरीरिणां निवेदयन्निव प्रतीचीजठरे निमज्जति । पतगाः पतङ्गभूपालं मागधा इव स्तोतुमुपक्रमन्ते । गूढं निशायां कुशेशयकोशनिवासिनः षट्पदा विक-

सितकुसुमसमूहेभ्यस्सुमनोरजांस्यार्जयितुं चरणान् बहिः प्रसारयन्ति । मन्दानिलोऽप्यमन्दं प्रसूनगन्धमावहन् निवारयंश्चाध्वनीनानां श्रमं वातीतस्ततः । सरितश्च किमपि वदन्त्य इव घोषितुमारब्धाः । अहो प्रमोदयति मे मनः सर इदमुन्निद्रकोकनदगन्धैः । आस्तीर्णं चाऽस्त्यत्र श्रान्तानां श्रमविनोदनाय प्रस्तरफलकमेकं । ततोऽत्र क्षणमुपविश्य मार्गायासमपनुदामि । (इत्युपविश्य) आः मृगयया मेऽवयवा अवशाः । अतः कञ्चित्कालमत्रैव शये । (इति शयित्वा) हन्त! नाऽतिदूराद्गीतध्वनिः श्रूयते । भवतु किञ्चिदाकर्णयामि । (गीताभिमुखं श्रोत्रे कृत्वा)

"पालय जगतां जननि त्र्यम्बकभामिनि सुरासुरैर्नमिते ।
अबलामनन्यशरणां विपिने निहितां(बलये ननु)र्देवि" ॥ ४ ॥

अये श्रवणानन्दकरीयं गीतिः । अवहितः पुनः शृणोमि (पुनः तथैव गीतं) कोमलपदसन्दर्भमिदं पद्यं अधःकृतवीणाध्वनिना कण्ठनिनादेन नितरां शोभते । गीतिरीतिश्च सङ्गीतकलाकौशलं व्यनक्ति । प्रायेण केनचिज्जितसुरसुन्दरीनिकुरुम्बेण तरुणीमणिना गीतं भवेत् । अस्तु समीपं सम्प्राप्य गाढं प्रवृद्धे निकुञ्जे यावदन्तर्हितः पश्यामि । अहो मत्सम्भावनानुरूपा रमणीमणिः । किमियं युवकविजयाय मदनसङ्गृहीतशरराशिः? अथवा कुसुमायुधविरहिता रतिः विरहभराऽसहिष्णुतया कामं प्रति कामं गायति? । (इति कुञ्जे उपविश्य गीतं पुनः शृणोति) । अत्रान्तरे मृगेन्द्रानुधाविता करिणी कुत्राऽप्याश्रयमनुपलभमाना साध्वसविह्वलिताङ्गी ससम्भ्रमं तरुगुल्मलतादीनामर्दयन्ती भयानकं बृंहितं वितन्वाना पादविन्यासैर्भुवं पातालमुपनयन्तीव तरुण्यधिष्ठितदेशमभ्याययौ । प्रकृतिभीरुः कदाप्यदृष्टकष्टपरम्परा रमणी तु प्रलयाम्बुदकठोररवानुकारिणा मृगेन्द्रगर्जनेन, व्याकुलितकरेणुप्रधावनेन च भृशं भयाक्रान्ता निश्चेतना मह्यां पपात । भाग्यवशान्नाऽतिदूरकुञ्जोपविष्टो

युवा स्वप्रत्यक्षमबलायाः सञ्जातमकाण्डमृत्युं परिजिहीर्षुः सद्यः प्रधाव्य तां गृहीत्वा चेलाञ्चलेन वीजयितुमारभत । तरुणकरसञ्जीवनभेषजेन वा, शीतलमातरिश्वशिशुस्पर्शेन वा क्षणद्वयात्सा चेतनामुपलब्धा अपरिचितपुरुषदर्शनेन च लज्जिता किमपि मनस्यालोचयन्ती नम्रमुखी बभूव । करिणी तु सा काननान्तरमविक्षत् । ततस्स युवा किञ्चिदूरं गत्वा तस्या अङ्गसौष्ठवं निध्यायन्, अहो धातुः सृष्टेर्वैचित्र्यम् । मन्ये च भुवि विधिरननुरूपस्त्रीजननिर्माणेन दृढं संलग्नं स्वीयमयश एतदङ्गनारत्ननिर्मित्याऽपनुनोदेति । ध्रुवमियमलौकिकमूलिकाविशेषः । अन्यथाऽस्याः केवलमङ्गस्पर्शेन ममैवं कुतः प्रमोदः समजनि । प्रायशोऽहं स्वर्गसुखमद्याऽनुभवामि, इत्यादिक्रमेण चिन्तयामास । तदा निश्शब्दताऽरण्यानीमलङ्करोति स्म । एवं क्षणद्वयं निर्ययौ । अन्योन्यसम्भाषणमिच्छतोस्तयोर्व्रीडा तिरस्करिणी बभूव ।

अन्ततस्सा भामिनी, अपरिचितोऽप्ययं मम प्राणपालकः, अतो मयैव पूर्वं संलापनीय इति निर्णीय लज्जावगुण्ठनामपसार्य "पुरुषवर! प्राणदातः! तत्रभवतोऽनिर्वचनीयोपकारेण भवदधीनोऽयं जनः । ततो युष्मद्वृत्तान्तविविदिषा मां परं बाधते । अबलेयं किमपि वदितुं न प्रभवति" इति वदन्त्यां तस्यां, युवा स्वाभिलाषं फलोन्मुखं विदित्वाऽत्यर्थं प्रमोदेन 'प्रमदामणिमान्ये मन्ये मगधेशः सुगृहीतनामा वीरसेनो भवतीकर्णपथमुपगत एवेति । स पुत्रवान्मया शूरसेनाभिधानेन । अहं पूर्वेद्युः सेनया साकं मृगयाविनोदायारण्यं प्रविष्टस्तत्र लक्ष्यभ्रष्टसिंहान्वेषणायेतस्ततः परिभ्रमन् सैन्याज्ञातवृत्तः परिच्युतसैनिकोऽश्वमारुह्य रजन्यां दूरं काननमटन्नतिमात्रश्रान्तोऽध्वश्रमनिबर्हणायानतिदूरसरस्तीरे शिलाफलकमधिशयितो माधुर्यझरीस्राविण्याः भवद्गीत्याः श्रवणेन तत्पन्थानमेवानुसृत्यात्रायातः किञ्चिदनन्तरमद्राक्षं शोचनीयावस्थामापन्नां भवतीं" इत्यवदत् । ऊचे एवं

रमणी

आकर्ण्य भामिनी सा तं क्षत्रियवरं स्वानुरूपं भर्तारं मत्वाऽञ्जसा-लज्जया परिभूतासीत् । ततः शूरसेनः, प्रभूते कष्टेऽपि धीरां तां राजन्यकन्यकेति जानन्नपि, तत्त्वजिज्ञासया तां "भवत्या कोऽयं देशोऽलङ्क्रियते? केन हेतुना स देशोऽद्य निर्लक्ष्मीको न शोभते? किं कुलं भवत्या सफलीकृतम्? को वा पिता दुहितृमान्विराजते? केयं संज्ञाऽलभ्यस्त्रीरत्नलाभेनान्वर्था? कुतो वाऽऽत्मेदृशीं कष्टदशां प्रापितः?" इति पप्रच्छ । तरुणी तदा कोकिलनिनादमधरीकुर्वती "विदर्भेषु कामपालो नाम नृपालः शीतांशुवंशावतंसो राज्यं प्रशास्तीति सर्वैर्विदितमेव । स **सौदामनी**नाम्नीं यां तनयां स्वमनोरथसर्वस्वमिव जानाति । साहं पूर्वेद्युस्सायं सह सखीभिरारामविहारार्थं निर्गता मध्येमार्गं कालपुरुषसदृशैश्चोरैराळीस्सन्तर्ज्यापाहृिये । ततस्ते नीचा मामत्रानीय सर्वाण्याभरणान्यर्पयित्वा बहुशः प्रार्थयमानामपि एवमगादिषुः । "न वयमाभरणप्रणयिनो द्रव्याशया त्वामत्राऽहराम, किंतु वाञ्छितसिद्धये गहनमध्ये विराजमानायै कालिकायै बलिं दातुं, तस्मात्त्वमत्रैव तिष्ठ"इति । ततो मद्गमननिरोधाय कञ्चित् वृद्धं पाटचरमादिश्य बलिसन्नाहाय कालिकालयं प्रायासिषुः । स्थविरस्तु क्षुधार्तोऽशितव्यार्जनाय इदानीमेव कुत्र वा निरगात् । अथ सिंहोऽपि मत्प्रत्यर्थी समजनि । तस्मादद्यापि कातरं मे मनः । अत्रान्तरे मद्भाग्यवशात् तत्रभवतां समावेशोऽभूत्" इत्यवोचत् । एवं संभाषमाणां मधुरवाणीं तां विलोकयन् शूरसेनो निमेषनिर्मातारं विधातारं नितरां निनिन्द । मनसि तु तां स्वायत्तामेव भावयामास ।

एतस्मिन्नवसरेऽन्तिक एव कलकलध्वनिरश्रूयत । सौदामनी तावत् कालिकाबलिदानार्थमात्मनः प्रापणाय चोराणां संभ्रमे इत्येवाऽमन्यत । ततः किञ्चिदुच्चैरभिवृद्धं निनादं श्रुत्वाऽऽत्ममार्गणाय प्रस्थितानामनेकदेशं भ्रमित्वा तत्रागतानां पितुः कामपालस्य नासीराणां

ध्वनिरिति निरचिनोत् । अतः सा एकतोऽकाण्डपरिचितं प्रणयसर्वस्वं पुरुषोत्तमं ते जानीयुरिति भीत्या, अन्यतस्तस्य विरहासहिष्णुतया च किमपि कर्तुमजानाना, "प्राणप्रिय! पुनस्ते दर्शनं मे मनोरथं पूरयतु। तदिदानीमङ्गुलीयकमिदं भवदङ्गुलिं मण्डयतु" इत्यभिधाय स्वीयमङ्गुलीयकं रत्ननिर्मितं तद्धस्ते न्यधात् । सोऽपि झटिति स्वनामाङ्कितमेकमङ्गुलीयकं तां सानुरागं पश्यन् "प्राणप्रिये ममापि स्मरणायेदमपि भवदङ्गुलिं भूषयतु" इति प्रदाय तरुषु अन्तर्दधे । सा तु पालनाय समीपायातानपि सैनिकान् प्रति विमनायमाना पूर्वोक्तपद्यार्धं पुनः पठित्वा सफलीभूतकार्यैर्हृष्टैस्सैनिकैस्सार्धं पुरं प्रययौ । शूरसेनस्तु तयापहृतमनाः तत्प्रदेशमप्युज्झितुमपारयन् वदननेदीयसोऽमृतस्य हानेर्दैवदुर्विलसितं निन्दं निन्दं नितरां खिन्नो भूयस्तस्याः दर्शने लोलुपोऽपि कमप्युपायमलभमानस्स्वपुरं प्रति प्रतस्थे ।

इति प्रथमः परिच्छेदः

द्वितीयः परिच्छेदः

अथान्येद्युः प्रभाते दासी भिषगालयं प्रस्थिता । तां दृष्ट्वा प्रतीहारी 'सखि! कालिन्दि, प्रातरेव कुत्र प्रस्थिताऽसि?' इत्यपृच्छत् । कालिन्दी–'अपि न वेत्सि? ~~म्रियस्स्वी~~ सौदामनी दिनद्वयान्नितरां व्याधिपीडिता गिरमपि न ददातीति? तदाज्ञप्तास्मि देव्या, कालिन्दि द्रुतमेत्य वैद्यमन्दिरं ब्रूहि निपुणकं "अस्वस्था सौदामनी तत्त्वयाऽनुपदमेवाऽवरोधं प्रत्यायातव्यमिति ।" तस्मादिदानीं नावसरः कालं यापयितुं, आदिष्टकार्यं निर्वर्तयामि' इति जवेन भिषगुदवसितं प्राप्यावलोक्य वैद्यं "आर्य निपुणक! देवी आदिशति 'अस्वस्था सौदामनी, भर्तृदा।

तदनुपदमेव भवतावरोधमागतेन भवितव्यम्" इति न्यवेदयत्। निपुणकस्तु निशीथे कस्यचिद्धनिकस्य चिकित्सां कृत्वा स्ववेश्म प्राप्य सुप्तस्तदैवोत्थितः। तस्याः वचनमाकर्ण्य नितरां क्रुद्धोऽपि, राजभीत्या स्वस्मिन्नेव "धनिनो वैद्यस्स्वपादसेवक इति मत्वा सदा स्वच्छन्दं भुक्त्वा विहृत्य च किञ्चिदनारोग्ये वैद्यो वैद्य इति प्रतिघटिकमाक्रोशन्ति । किं वा विधास्यामः, वयं राजसेवकाः । अथवा कार्यमेवैतन्निन्दितम् । अशुचीन्यपि स्प्रष्टव्यानि । पूतिगन्धीनि मृतमानुषदेहान्यपि शस्त्रेण विदारयितव्यानि।" इत्यादि वदन्, 'भवत्विदानीमेवाव्रजामि त्वं याहि' इति कालिन्दीं प्रेष्य स्वयं नेपथ्येनालंकृतस्तैलशकटं आरुह्य राजगृहं प्रययौ।

सम्प्राप्तहर्म्यो निपुणकोऽवरोधं प्रविश्य देहदौर्बल्यमापकयन्त्रं सौदामन्या उरसि निधाय परीक्षते स्म । तदा यथार्थनिवेदने यन्त्रमेव दुर्बलमासीत् । ततः सोऽत्युष्णं वपुः स्पृष्ट्वा प्रायश उष्णज्वरेण भवितव्यमिति निश्चित्य कक्षे ज्वरमापकयन्त्रं निवेश्य किञ्चित्तूष्णीमासीत् । पञ्चनिमेषानन्तरं तदुद्धृत्य तस्मिन् पश्यति सति तेन पञ्चोत्तरशतपरिमाणान्यवलोकितानि । अतस्तूर्णं स बलीयानस्याः ज्वरः शीघ्रं गाढं चिकित्सितव्यमिति सम्भाव्य राजानं प्रति "सौदामन्यतिवेलमुष्णज्वरेण पीड्यते, तत् यन्त्रेण शरीरान्तरेः औषधं प्रवेशनीयम् । तदहमस्मिन्नेव क्षणे गेहाद्भेषजेन सह यन्त्रमानेष्यामि" इत्यभिधाय तेनानुज्ञातः तीव्रं शकटेन निजालयं प्रति प्रातिष्ठत।

पश्यत विधिवैचित्र्यं, निपुणको वैद्यविद्यामभ्यस्योत्तमवैद्यपरीक्षामुत्तमतयोत्तीर्य विदर्भपुरे कामपालस्य राजधान्यां प्रधानवैद्यपदवीं प्राप्नोत् । वर्षचतुष्टयात् स्वकार्यमतिनैपुण्येन कुर्वन् लब्धयशाश्च समभवत् । एवं स्थितेऽपि विधिमहिम्ना स तत्त्वार्थं ज्ञातुं न शशाक । सौदामनी कामज्वरेण बाधितेति सखीभिः काभिश्चित्तदवस्थामवलोक-

नेन विदितमेव । तथापि सर्वा वैद्याद्बिभ्यति स्म । भवतु इतः परं किमप्रागल्भ्यं पदं लभत इति ईक्षामहे । वैद्यं च प्रतिपालयामः ।

अगदङ्कारस्तु त्वरया समागत्य यथामति यन्त्रेण चिकित्सां विधाय "अचिरेणैव शाम्यति ज्वरः । साधयामीदानीं, सायं पुनः आयास्यामि" इति राज्ञीमामन्त्र्य निरगात् । राज्ञी तु रोगनिवारणं दृढं निश्चित्य कार्यान्तरव्यापृता संवृत्ता ।

माकीं षड्घण्टासमयः । भगवानरुणसारथिः वारुणीसेवया पद्मिनीनां मानं सम्पादयन्निव कुत्रापि व्यलीयत । मन्दमारुतस्तु सन्ध्यानर्तक्या साकं अपूर्वमभिनेयमभिनयन्निव सर्वतो वहन् सौगन्ध्येन वियोगिनां मनसि शल्यमङ्कुरयामास । राकाविभावरीनायकस्तु पूर्णकलाभिर्जगतीमभिव्याप्तुमिव एकैकस्यामाशायां क्रमेण कौमुदीं प्रसारयितुमुपाक्रमत । कलानिधिकलामाकलयदिव कुमुदकुड्मलनिकुरुम्बं एकैकदलविकसनक्रमेण पुष्प्यति स्म । इतो राजधान्यामवरोधे उद्घाटिता विशङ्कटगवाक्षाः शिरीषकोमलां सौदामनीं निरीक्ष्योद्भिन्नहृदया इव व्यभासन्त । जालान्तरं यदृच्छया रेखाकारेण प्रविष्टाः ज्योत्स्नाः मृदुशीतला अपि मदननिर्मुक्तनिशितास्त्रसन्ततय इव सौदामनीं भृशं व्यथयन्ति स्म । एवं क्रमेण व्याधिः परां काष्ठामवाप ।

अत्रान्तरे निपुणकः प्रशान्तप्रायमामयं मन्यमानः सौदामनीशयननिकेतनमेत्य पुनः परीक्षां चक्रे । तस्याः स्पर्शमात्राच्चकितः स्वयशोमालिन्यं सम्भावयन् तन्निकटवर्तिनीस्सखीरामन्त्र्य "कामपालनन्दिनी भवतीनां सखी अतिक्रान्तभेषजमार्गा विद्यते । ततो राजानं प्रति सौदामनी बाढं ज्वरेण पीडिता, निपुणकप्रयतनं निष्फलतामावहतीति विज्ञापयन्तु । अहमितः प्रबलतरं भेषजमालोचयामि" इत्यभिधाय स्वोदवसितं प्रति प्रतस्थे । आळयस्तु नितान्तमुद्विग्ना यथोक्तं निर्वाहयामासुः । महीपतिः प्रियपुत्र्या अस्वस्थतातिशयस्य श्रवणमात्रेणाऽशनिताडितमहीभृदिव

मूर्छामियाय । ततोऽनुचरैराश्वासितः सह सचिवेनान्तःपुरं सम्प्राप्य कुमारीं विलोक्य किमपि वक्तुमजानानः स्तम्भतां भेजे । तदा चतुरधीर्नाम मन्त्री अञ्जसा सौदामनीं निशाम्य मनसि विमृश्य तत्सखीरस्वस्थतानिदानं पप्रच्छ । ता अतिवेलमाकुलाः "प्रियसखी चोरापहरणादारभ्य एतादृशीं दशामारूढा । अस्याश्चेदानीं चन्द्रिकाऽशनिवदाचरति । चन्दनचर्चा तु विषलेपनसदृक्षतां याति । मलयमारुतः स्फुलिङ्गायते । पाण्डिमा परं कपोलतले विरूढोऽपि सहजलावण्यं न निराकरोति । मृणालवलयधारणं किञ्चित्सह्यं भवति । अस्मास्वन्योन्यं सुन्दरपुरुषाणां लावण्यं वर्णयन्तीषु निश्चलतया शृणोति । दीर्घं निश्वसिति च । एभिः कारणैर्वयं अस्मत्सखी परं पञ्चशरसात्कृतेति मन्महे" इत्यवोचन् ।

चतुरधीस्तु स्वालोचनानुगुणमेवाऽसां वचनमाकर्ण्यामूषां नैपुण्यमत्यन्तमभिनन्द्य नृपतिमेवं व्यज्ञापयत् । "देव सौदामनी मदनायत्ता तद्वेदनाया ऋते नान्यां ज्वरवेदनामनुभवति । मन्ये निपुणकोऽस्मिन् विषये किञ्चिदचातुर्यमवापेति । अनुभवशालिनां सखीजनानां वचनं प्रामाण्यपदवीमधिरोहति । अद्य विवाहानुरूपवयोभूषितामेनां विलोक्यापि औदासीन्यं भजाम इति वयमेवापराधं वहामः । तस्मादचिरेण बहुदिवसाद्याचमानस्य कलिङ्गभूपतेः शान्तिवर्मणस्तनयाय देवस्य भागिनेयाय युवराजविजयवर्मणे प्रदाय विवाहकार्यं निर्वर्तयामः । अस्य कुलादिकं अस्माभिर्विदितमेव । तस्मादिदानीं शान्तिवर्मणे पत्रिकामेकामतिसृजामः । लेख्यविषयश्चैवम् ।

"स्वस्ति, आवुत्ताय शान्तिवर्मणे । चिराद्भवद्भिस्सूचितं विषयं पर्यालोचयतामस्माकं कार्यान्तरनिरोधात् बहुतिथः कालो निर्यातः । सम्प्रति आगामिमाघशुद्धपञ्चम्यां दिवा मीनलग्ने चिरञ्जीविविजयवर्मसौदामन्योः पाणिग्रहणमङ्गलोत्सवं निर्वर्तयितुमुत्सहे । ततो भवन्तः

सौभाग्यवत्यै भगिन्यै विभ्रमवत्यै एनं वृत्तान्तं निवेद्य सह परिवारेणाचिरेण विदर्भराजधानीं भूषयन्त्विति सप्रश्रयं प्रार्थये" इति। भूपालश्चामात्याभिसन्धिं प्रतिपद्य तथैव व्यधात्।

इतः शूरसेनस्य सौदामनीमेव ध्यायत एकैकदिवसोऽपि वर्षायते स्म। वैणिकेषु आस्थानमण्डपे वीणां वादयत्सु, गायत्सु गायकेषु, सामाजिकेषु च मनोरमेयं गीतिपरिपाटीति तान्प्रशंसत्सु, सपुलकोद्गमो भ्रान्त इव दिशो विलोकते स्म। चन्दनेषु शैत्यदोषमुद्घाटयन् लेपनं दूरतस्तत्याज। मलयमातरिश्वशिशून् भुजगनिश्वासान् मेने। गोत्रस्खालित्यविदितमदनतापान् वयस्यान् व्याजेन केनचिदतिसन्दधे। अन्ततस्सुहृद्गोष्ठ्येवारुचिरेति विदित्वा किञ्चित्सन्तापापनोदनधिया प्रमदवने सञ्चचार। परन्तु अङ्गुलीयकेन विश्वासिता राजन्यकन्यका सौदामनी स्वायत्तेत्येव मन्यमानः कथमपि जीवितमाललम्बे।

इति द्वितीयः परिच्छेदः

अथ तृतीयः परिच्छेदः

अथ सौदामनीविवाहवार्ता विदर्भेषु सर्वत्र व्यानशे। समस्तवृत्तान्तपत्रिकासु इयमेव प्रधानोदन्ततया परिणनाम। सौदामनी तु आनन्दोदधौ निमग्नाभिर्वयस्याभिस्सोपहासमाख्याता सद्यः सोत्कण्ठापि स्वाभिमतं तं शूरसेनं स्मरन्ती अनुपदमेव मुमूर्छ। ततो दासीशैत्योपचारैः कथमपि चेतनामुपलभ्य बाढमुद्विग्ना सती एवं चिन्तयितुमारेभे।

"स्वप्नेऽपि तमेव हृदयहारिणं अकाण्डोपनतमृत्युमुखाद्रक्षितारं अङ्गुलीयकविनिमयेन प्रिय इति निर्णीतं शूरसेनं चिन्तयन्त्यां मयि

कोऽयमशनिपातः । साध्वीशिरोमणीनां चेदं कुलव्रतं, यदेकस्मिन् जन्मनि नियमितपतिमन्तरान्यावरणम् । स्त्रीभिश्च लोके सर्वथेदमनुपालनीयम् । अन्यथाऽऽचरन्तीनां सृष्टेरेव स्रष्टा जुगुप्सते । पित्रननुमत्या कन्यकानां पतिवरणं न शस्यत इति परं बाधते । तथापि मे मृत्युवदनप्रविष्टायाः पालयितुरनुरूपक्षत्रियवीरस्य पाणिपीडनं तातोऽप्यनुमन्येत । परं त्विदानीं वरान्तरोपयमव्यवसितो भूपतिः पिता यदि मे मनोरथं विद्यात् तर्हि स्वनिश्चितार्थभङ्गभिया मन्मनोरथं न पूरयेत् । तन्मयाऽधुना इमं वृत्तान्तं तस्मा असूचयित्वैव सह रहस्यगोप्त्रीभिर्वयस्याभिरालोच्य कार्यान्तरव्यग्रया भवितव्यम् । श्रूयते चानेकक्षत्रियकुमार्यः पित्रननुमत्यैव गान्धर्वविवाहविधिना विवाहितास्ततोऽनुमोदिताः पितृभिरिति" इति ।

तथा चिन्तितं सर्वं प्रियसखीभ्यो निवेदयामास । तासु एकतमैवमब्रवीत् "भूपतिर्विदितार्थो भवतु, सोऽत्रौचित्यं विचार्य विधेयं विदध्यात्" इति ।

अपरा– "यदि नरेन्द्रो जानीत, तर्हि प्रियवयस्याभिलषितं न निष्प्रत्यूहं सङ्घटेत; तस्माद्रहस्यं किमपि मन्त्रयितव्यम्" इति ।

अन्या– "तत्सपद्येव सौदामनीहस्तलिखितं पत्रमेकमस्मद्रहस्यवेदिनो गौतमस्य द्वारा वसुधाधिपाय शूरसेनायातिसर्जनीयम्" इति ।

ततस्सर्वा अपि अस्या वचनमेव सिद्धान्तयित्वा गौतमनामानं द्विजोत्तममाकार्य तं वस्त्रादिना सम्मान्य, सिद्धे कार्ये तस्मै महासम्भावनां च प्रतिज्ञाय सौदामनीहस्तलिखितां पत्रिकां तद्धस्ते वितीर्य प्रेषयामासुः ।

स च क्रोशद्वयमतिक्रम्यातपसन्तप्तावयव एवमात्मन्येवाचिन्तयत्– "मया तु द्विजेन धनतृष्णया बहुदिनगन्तव्यमप्यध्वानमविगणय्य गुरुकार्यनिर्वर्तनमङ्गीकारि । तासां स्वकार्यसाधनव्यग्राणां योषितां मदुःखा-

लोचना कुतः । प्रायशः स्त्रियो लोके निजकार्यसाधननिपुणाः प्रगल्भमपि पुरुषं स्वविलासपरवशं विदधते । द्रव्याशां जनयन्ति च । अस्मादृशाः ब्राह्मणाः परं द्रव्यलोलुभाः काकिणीमेकामपि बहुमन्यमानाः निर्विश्यमानां दुःखपरम्परां तृणाय मन्यन्ते । एतत्सर्वस्यापि दारिद्र्यमेव निदानम् । अकिञ्चनतापिशाचिकापीडितानां मादृशानां, निर्वृतिपरिचयः कुतः अस्तु तावदियं चिन्तापरम्परा । ऊरीकृतकार्यं प्रथमं साधनीयम्" इति ।

तथा स सहस्रभानुभानुपरितप्तोऽपि सन्तापमविगणय्य क्षिप्रतरं गच्छन् दिनद्वयान्मगधेशदृष्टिपथमवाप । पत्रिकां चादात् । शूरसेनस्तावत्पत्रसन्दर्शनमात्रेण सौदामनीदौत्यकारिणं ब्राह्मणमुच्चतरातिथ्येन परितोष्य प्रेषयामास । स्वयं च विविक्तप्रदेशमुपगम्य पत्रमेवं पठितुमारभत ।

"स्वस्ति, मद्धृदयहारिणे तस्मै पुरुषवराय, यमेवावलम्ब्य या जीवितं दुःखशतादपि पालयति, दैवदुर्विपाका सैवं सप्रणामं विज्ञापयति । तत्रभवता जुगुप्सया वा, निर्घृणतया वा, प्रियाशतपरवशान्तरङ्गतया वा, नितान्तशोचनीयावस्थापात्रतां नीतोऽयं जनः । गुरुजनश्च मां परतन्त्रयितुं यतते । न जान एतावत्पर्यन्तं भवद्वार्ताम् । यदि दीनेयं एकैकमपि दिनं वर्षायमाणं यापयन्ती, त्वदायत्तजीविता कथञ्चिदपि एकान्ततः पालनीयेति दया भवद्धृदयकोणे यत्र कुत्रापि लेशतः प्रतिष्ठां लभेत, तदा दयालुना श्वो निशायां एकघण्टासमये राजभवनेषु झषकेतनकेतनं निकेतनं तन्त्वधिरोहिणीसमाश्रितं समासाद्य कैरपि अविदितवृत्तान्तं स्वपुरमवश्यं प्रापणीयेयम् । परस्तात्सम्भाव्यमानान्तरायसन्ततिरपि निवारणीया । यदि कार्यान्तरायत्तेन दयितेनोदास्येत, तर्हि परस्मिञ्जन्मनि सौदामन्यवश्यं भवतैव प्रेयसीपदमधिरोहयितव्या" इति । अन्तरा पठनमस्य नयनद्वयमश्रुपूर्णमतःपरं लिपिं द्रष्टुं न शशाक ।

तथापि कथञ्चित्पठित्वा यथासन्देशं कार्यविधानं निश्चिकाय । तस्मादृते किञ्चिदपि तन्मनसि नाभासत ।

परेद्युः प्रभाते नवघण्टावेलायां जितमारुतजवं वैनतेयनामानमश्वमारुह्य मानससम्प्राप्तविदर्भोऽपि वायुवेगेन विदर्भान् प्रति प्रतस्थे । क्रमेणारुणसारथिरस्ताचलमगात् । अन्धकारसङ्घातो गाढं जनानां नेत्राणि अन्धयितुमारेभे । एवं रात्रिः प्रवर्धते स्म । घटिकारस्तु एकघण्टामताडयत् । कुमारीभवने दीपिकाः किल सौदामनीसाहाय्यविधानायातिशयेन प्रज्वलयितुमुपचक्रमिरे । सौदामनी तु सज्जीकृतनेपथ्या प्रतिक्षणं गवाक्षेऽक्षिणी निक्षिप्य बहिरीक्षते स्म । सख्यस्तु वियोगभरदुःखिताः न किमपि संलपितुमशक्नुवन् । भूभृद्भृत्याः निद्राङ्गनालिङ्गिता निश्चेतस इव ददृशिरे । यामिकाश्च दैववशात् स्वप्रदेश एव स्वप्नपरतन्त्रा उत्कीर्णपुत्रिका इव चकाशिरे । अत्रान्तरे सुदूरादश्वखुरपुटध्वनिरश्रूयत । श्रवणमात्रेण सौदामनी सपुलका प्रियं करबदरसदृशं मन्वाना तस्यामेव दिशि दत्तकर्णा बालकुरङ्गीवाभासत । स निनादः क्रमेण मन्दीभूतस्तां संशयसिन्धावमज्जयत् । ततो नातिदूरे बालोद्यानसविधे वाजिनं निबध्याऽऽव्रजन्तं हीरप्रोतकुण्डलालङ्कृतगण्डाभ्यां तमिस्रायाः सूर्यभ्रान्तिं सन्दिशन्तमिव भ्राजमानं कमपि युवानमद्राक्षीत् । स तु अपरिचितसौदामनीवेश्माऽपि दीपशिखादूतिकानीत इवारोढुं तन्त्वधिरोहिण्यां पदं निदधे । एतस्मिन्समये तद्भवनं दक्षिणेन जनसंलापोऽश्रावि । तदाकर्ण्य धीरोऽपि शूरसेनः किञ्चिच्चकितस्तत्पुनः परीक्ष्याऽन्ततो यामिकानां स्वप्नसँल्लापं मत्वा धैर्येण प्रासादमारुरोह । आळयस्तु अपरं मन्मथमिव तं पुरुषर्षभमवलोक्य सख्यनुरूपपतिलाभेन सन्तृप्तान्तरङ्गा अपि भाविवियोगदुःखभराक्रान्ता राजदूतभीताः कालमनतिवाह्य, "राजकुञ्जर, अस्मत्सखीयं भवद्वल्लभा यथास्मान्न चिन्तयति तथा परिपाल्या" इति सम्भाष्यातिकृच्छ्रेण तां तेन समं प्रेषयामासुः ।

सौदामनी च "नमः सखिभ्यः, कदाचिदपीयं मन्दभागधेया न विस्मरणीया" इति आमन्त्र्य प्रियेण साकमश्वमारुह्य मनोवेगेन मगधराजधानीमियाय । तत्र तु गान्धर्वविधिना विवाहिता, प्रधानमहिषीपदमवाप्ता, प्रमोदपारावारमवगाढा च सती सुखेन कालमतिवाहयति स्म ।

इतो विदर्भराजधान्यां नवपल्लवतल्लजसम्भूषितास्तोरणस्तम्भाः शिरांस्यान्दोलयन्तोऽतिथीन् सत्कुर्वाणा इव व्यराजन्त । अचेतनान्यपि सात्मयन्तो नवोन्मिषन्मङ्गलतूर्यस्वना विवाहमहोत्सवदिदृक्षूनाह्वयमाना इव दशस्वाशासु उदजृम्भन्त । भरतागमपारदृश्वा, अभिनेयाभिनयचणः, पञ्चशरग्लपितप्राणानां यूनां स्वान्ते जीविताशाङ्कुरोच्छेदननिपुणोऽनुपमलावण्यपण्योऽसङ्ख्याको गणिकागणो नृत्यकौशलसम्प्रदर्शनेऽहमहमिकया राजधानीं प्रातिष्ठत । अतिथिष्वनेके पूर्वमेव प्रकल्पितानामपि स्वासनानां व्यत्ययभयात् द्रुततरं प्रधावन्ति स्म । अत्रान्तरे भूसुराणां आहूतानामनाहूतानां चान्योन्यसम्भाषणधोरणी इत्थं समजनि ।

अप्पशर्मा– सुब्रह्मण्य, भूमीन्द्रेण स्वनन्दिन्युपयमे पुरोधस इतरे भूमिदेवाश्च कियद्दक्षिणया परितोष्या इति सङ्कल्पितं अपि वेत्सि ? ।

सुब्रह्मण्यशर्मा – यदि विवाहो निष्प्रत्यूहं प्रचलेत्, तदा भूपतिसङ्कल्पितरीत्याऽस्माकं देशान्तरादायातानां दशवराहलाभो भवेत् । एतन्निःसन्देहम् । कुसूलान्तर्वासिमूषकाणामिव सदावरोधादिषु पर्यटतां कुलपुरोहितानामेकैकस्य द्विशतरूप्याणि राङ्कवयुगलं च वितरेदिति भूपतिना निरणायि । दूरादागतानामप्यस्माकं मार्गव्ययात्पञ्च वराहाः प्रायशोऽवशिष्येरन् । इतः परं ब्राह्मणानां भाग्यं प्रमाणम् । यमि

अप्पशर्मा – कथं विवाह एव सन्देहः ? । प्रतिश्रुतं च विशांपतिना कन्यादानं विजयवर्मणे । तत्पिता शान्तिवर्मा च सपरिवारो विदर्भनगरे वरपित्रनुरूपातिथ्येन सत्क्रियते । अद्य प्रचलिष्यति च विवाह-

मङ्गलोत्सवः । ततो मे चेतोऽस्मिन्न सन्देग्धि । परन्तु पूर्वमितः पुत्री-शान्तिकर्मणि नृपतिना वित्तलोभोऽकारीति अश्रावि । ततोऽनुभूतं तद-नुरूपं तनयायाश्चोरापहरणेन फलमिति च । यदि भवदभिहितोदन्त-स्तथ्यपथं प्रविशति तदा धन्या वयम् । किञ्च राजकुलपुरोहिता अनिशं भूपालसेवया परिक्लिश्यमानाः कदाचिच्छ्मानुगुणं फलं लभन्त इति तेऽनिन्द्याः ।

सुब्रह्मण्यशर्मा– अपि न जानाति भवान् कामपालेन वरवरणे सुता-नुमतिर्नाङ्गीकारि । राजन्यकुलाचारेण स्वयंवराय क्षत्रियसभा च ना-कल्पि । परन्तु विजयवर्मा कुरूपोऽपि केवलं भागिनेयधियाऽऽत्मजानु-रूपपतिरिति मत्वा परिणयो निरणायि । एतद्विदितमात्रेण सौदामनी मनस्यतिमात्रं सन्तप्य द्विगुणितवेदना गुप्तं सखीभिः सह कार्यान्तरकरणे उद्युक्ता वर्तत इति कर्णाकर्णिकया च विज्ञातां लोकवार्ताम् ? ।

अप्पशर्मा – नैतच्छास्त्रसहं, यत्कन्यास्तातानुमत्या स्वच्छन्दं प्रवर्तन्त इति । 'न स्त्री स्वातन्त्र्यमर्हति' इति स्मृतिश्च निश्शङ्कमुद्घोषति । यत् कन्या अपरिणतधिषणा बाल्ये पितृपरवशा अपि मन्मथपरवशास्तात्का-लिकशेमुष्याऽवरमपि वरं मन्यमाना यं कञ्चिद्वृणते, तदन्तेऽसदृशसन्ताप-प्रदायीति अगणितोदाहरणैर्निर्णीतोऽयं विषयः । भवदुदितं मृषेतरच्चेत् सौदामन्यनुपमलावण्यापि शुभेतरपारावारं प्रविशति ।

सुब्रह्मण्यशर्मा – एष भूतार्थ एव । तथापि कामपालवत्केचित्पि-तरो बान्धवप्रेम्णा, केचिद्द्रव्याशया चाननुरूपाय कन्याः प्रददति । अथ दम्पती तावन्योन्यमैत्रीविरहेण क्लेशातिशयमनुभवत इति च दृष्ट-चरम् ।

अप्पशर्मा – एतन्मूढमातापितृपरं, बुद्धिमन्तौ तु पितरौ सुता-सुखदुःखवेदिनौ विमृश्य कार्यं कुरुतः । न कदाऽपि पित्रोश्चेतसि कन्या

दुःखमनुभवत्विति विद्यते । कामपालस्तु धीमान् विमृश्य कार्यकारीति च प्रथितमेव । कथमपि मल्लिकालता स्नुहिवने पदं न निदध्यात्, पश्यामः इति उभावपि राजभवनं प्राविशताम् ।

नृपेन्द्रसदने वाद्यनिनादः शनैः शनैरुदजृम्भत । भगवानम्बरमणिरम्बरे बाहुद्वयद्वयसं देशमारुरोह । वरो मङ्गलस्नातो विवाहमण्डपमलञ्चकार । नानादेशादायाता अवनिपतयो भूदेवा गायका इतरे च स्वस्वस्थानमशून्यं विदधुः । पुरोहिता मन्त्रमुच्चैरुच्चरितुमारेभिरे । एतस्मिन्नन्तरे कन्यालङ्करणाय नियुक्तास्सख्यस्सौदामनीशून्यमवरोधमवलोक्याऽशनिताडिता इव भीता राज्ञ्यै वसुनन्दिन्यै निवेदयामासुः । देवी तु गाढमुद्विग्ना स्वयमवरोधं प्रविश्याऽदृष्टप्रियतनयावदना मुमूर्छ । ततो दासीभिरुपचरिता कथमपि चेतनां सम्प्राप्य भर्त्रे उदन्तमेनं व्यजिज्ञपत् । स च क्षणं किमपि विधातुमजानानो निश्चलतामवाप । अयं वृत्तान्तस्त्वेकदैव तत्रत्यानां श्रुतिपथमनुपेदे । ते नितान्तं सन्तप्य विधिदुर्विपाकस्यालङ्घ्यतायाः स्मरन्तस्स्वपथमनुजग्मुः ।

इति तृतीयः परिच्छेदः

चतुर्थः परिच्छेदः

अथैकमात्रतनयो वसुधाधिपतिरेकतः प्रियनन्दिनीविरहातङ्कभरेण, अन्यतः सङ्कल्पितविवाहमहोत्सवभङ्गेन प्रतिनिवृत्तबन्धुवर्गेण च नितरां निर्विण्णो दुःखजलधौ निमग्नोऽलब्धकूलो भागधेयमात्मनो निकामं निन्दन् प्राणानपि परिपन्थिनो मेने । तथापि राजन्यान्ववायप्रसूततां सार्थयितुमिव किञ्चिद्धैर्यमापन्नो निर्ज्ञातगुणान कार्यान्तर-

साधननिर्धारितकर्तव्यकरणनैपुण्यान् विविधभूमिका बिभ्राणान् कांश्चिद्दूतान् सर्वासु दिक्षु सौदामनीमार्गणाय प्रेषयामास ।

एवं व्यतीते दिवसत्रये, दूतेषु मगधराजधानीं प्रयातः सुबुद्धिनामाऽहितुण्डिकवेषधारी चारवीरो मगधनृपतिसदनमुपेत्य यावदहिक्रीडां प्रदर्शयितुमुपाक्रमत, तावद्बाला युवानः स्थविरा युवतयश्चादृष्टचरीं विस्मयजननीं उरगलीलामाकलयितुं सत्वरमाव्रजन् । सौदामनी च सखीभिस्सह प्रासाद एवोपविश्य पश्यति स्म। तदाऽहितुण्डिकाकल्पपिहितनिजस्वरूपस्य सौदामनीवृत्तान्तोपलब्धिमुख्यफलस्य सुबुद्धेर्नयनद्वयं युगपदुद्दिष्टकार्यनिदानभूतायास्तस्या उपरि पपात। अथ तां कामपालनन्दिनीत्यसंशयं विज्ञाय फलोन्मुखं स्वप्रयत्नं प्रशंसन् विदर्भां प्रतिनिवृत्य भूपतिमेवं विज्ञापयामास "देव इन्दुवंशावतंस! मा सन्तापयात्मानं, मगधान्प्रस्थितवता मया जीवितावलम्बनहेतुः स्वामिनो नन्दिनी सन्दृष्टा । व्यालग्राहिनेपथ्यधरस्य चारस्य मे वाक्यमन्यथा मा सम्भावय । तदधुना तामचिरेणावाप्तुं यत्नं कुरु । अतः परं देवः प्रमाणम्" इति । तदाकर्ण्य नरेन्द्र आनन्दपाथोनिधौ गाहं गाहमेवमभाषत "सन्ति तावद्दूताः परःसहस्रं भुवने, ये प्रतिमासं वेतनग्राहिणः प्रतारणपराः प्रभोरपरोक्षमादेशविधानव्यग्राः परोक्षे तु स्वकार्यसाधनचतुराः स्वामिद्रोहिणः । तांस्तु दूतवेषिणः परिपन्थिन एवेति मन्ये । ते तु परं विरलाः, ये खलु नित्यं स्वामिभक्ताः तत्कार्यसमर्थनमेव दौत्यं मन्यमानाः अगणितगुणमणिवरुणालयाः भवादृशाः । तदिदानीमिच्छामि ते मनोरथमापूरयितुम्" इति । स नताननो राज्ञो वचनं श्रुत्वा सङ्कुचन्, देव, दूतेन मया दौत्यं निर्वर्तितं तदद्य न सम्मानार्होऽहं; प्रभोः प्रसादमेव महान्बहुमान इति मनुते मे मनः । तत्त्वरया परस्ताद्विधेयं विदधातु देव इति भूपतिमाभाष्य स्वस्थानमशून्यमकरोत् । नृपतिस्ततो विज्ञातपुत्र्यवस्थानतया कथञ्चिदवलम्बितप्राणोऽपि तदानयनोपायालाभेनाहोरात्रं चिन्तयितुमारभत । दिने

दिने शरीरे कृशतावर्धिष्ट । तनयाविरहातिशयदूनायाः वसुनन्दिन्यास्तु आहारपरिग्रहोऽपि अविषायिष्ट । प्रतिक्षणं सा तनयानयनाय भर्तारं बोधयन्ती तपस्विनीमवस्थामुपागच्छत् ।

अस्मिन्नवसरे कार्यान्तरासक्तस्वान्ततयाऽश्रुतसौदामनीस्थितिः अविदितदुरवगाहशोकाम्बुध्यवगाढधराधीशः चतुरधीर्नाम सचिवाग्रणीः भूपालमवलोक्य सेवकैस्सौदामनीस्थितिं विज्ञाय स्वयं बाढं खिन्नस्सन् (मनस्योलोच्य राजानमेवमब्रवीत् । "देव, इदानीं मगधेशस्य सन्धि-सन्देशातिसर्जनादृते सौदामनीलाभाय कमप्युपायं न वेद्मि । वाचिकं चेत्थमस्तु– 'स्वस्ति, मगधेश्वराय शूरसेनाय, विदर्भराजः कामपाल एवं निवेदयति; यत्तत्रभवता गुप्तं मत्कन्यापहरणं कृतं तद्राजन्याचारपरिपाटीं न विन्दतीति निर्भयं वदामः । मनस्विनस्ते धर्म्यपथानुवर्तिन एतदनु-चितमिति लोका उद्घोषयन्ति । तदिदानीमपि मे तनयायाः सौदामन्याः प्रत्यर्पणपूर्वकं सन्धायान्योन्यमैत्रीं परिपालयतु भवान् । अन्यथा विम-नायते कामपाल इति निश्चितम् । निरीक्ष्यन्ते च पञ्च दिनानि । यशो-मालिन्यसम्पादयित्री दुर्नीतिस्तव हृदयेऽवकाशं न लभतामिति वारं वारं प्रबोधयति विदर्भेशः' इति । यदि एतत्सन्देशस्य प्रतिकूलस्तादृशो राजा भवेत् तदा कृपाणपाणयोऽस्मत्सैनिकाः साकं शान्तिवर्मयोधैः पिबन्तु मगधेशयशःपीयूषम्" इति ।

भूपतिस्तदाकर्ण्य "प्रायशस्तादृशाकृतिर्गुणविरोधिनी न भवेत् । एवमपि यदि न सन्दधीत तदा वयं विजिगीषवो भवितुं नार्हामः । यन्मया पुत्रीविवाहः प्रतिश्रुतः तत्र कन्यार्थिनौ द्वौ समजनिषाताम् । तयोः कश्चि-द्विजयी सम्बभूव । तस्मादिदानीं युद्धेन विजयवर्मैव विजयार्थी, तत्तेना-योधनाय सैन्यं सज्जीक्रियेत । राजनीतिश्च तादृशी । वयं च साहाय्य-विधायिनस्तस्य" इत्यवोचत् ।

अमात्यस्तावदीदृशकष्टदशायामपि नृपतेर्धर्ममार्गानुगमनमतिवेलमभिनन्द्य, मगधराजाननुकूल्ये कामपालाभिसन्धिमेव सिद्धान्तयित्वा, चारमुखेन पूर्वोदितसन्देशं पत्रिकायां विलिख्य प्रैषयत् । स चारो दिनत्रयेण मगधराजधानीमासाद्य द्वारस्थद्वारा पत्रं भूपतिमनैषीत् ।

मानधनः शूरसेनस्तु पत्रिकां पठित्वा राजन्यधर्ममूढं कामपालं स्मारं स्मारं विहस्य वृत्तमिमं सौदामन्यै न्यवेदयत् । सापि मनसि मुहुरालोच्य भविष्यद्विधिदुर्विपाकं अवश्यं भाविनं निर्णीय अमन्दं खिन्ना प्रेयांसमेवं व्यजिज्ञपत्- "प्राणप्रिय तातोऽपि मे पातिव्रत्यस्य भङ्गमुत्पादयितुं यतते । भवतु स्वप्नेऽपि अन्यपुरुषमचिन्तयन्ती क्षत्रियाणी सौदामनी कदापि भाविसुखपरिपन्थ्यवस्थायाः बिभेति इति न मन्तव्यम् । लोके प्रमदानामिदं हि कुलव्रतम्, यत्प्राणव्ययेनापि पातिव्रत्यं पालनीयमिति । वामा चास्माद्दुःखशतमनुभूय नरके नियतं वसतीति सर्वजनप्रथितम् । एवं सति इदानीं मे पितुः पत्रिकाया उत्तरं तत्रभवतो यथाभिमतं विलिख्यताम्" इति ।

अथ राजा पत्रिकामित्थं प्रत्युत्तरेण पूरयामास—"साञ्जलिर्मगधेशः शूरसेनो (अथवा जामाता) यशोभूषिताखिलाशं विदर्भजनपदभाग्यं कामपालं प्रजापालं (श्वशुरं) एवं विज्ञापयति । यद्भवद्भिर्नयविद्भिरपि सन्दिष्टं तद्धृदयं मे नितरां तोदयति । सौदामनी बाहुजाचारपरिपाटीमलङ्घयता मया गान्धर्वविवाहविधिनोढा । अयं धर्मपक्षपातिनां भवादृशां विपश्चितामपश्चिमो भवेत् । यद्यावयोर्दैवं दुर्विलसितं व्यञ्जयेत् तदा निर्भयं तादृशं दुःखमनुभवितुं सिद्धोऽस्मीति निश्चप्रचम् । कस्य वा दौरात्म्यमत्र निदानमिति लोका विदाङ्कुर्वन्तु । मगधभूमीन्द्रान्वयेन्दौ कदापि कलङ्कः स्थानं न लभेत । धीरता च जन्मभूमिं स्वच्छन्दं हातुं न प्रभवेत् । इतः परं दैवं प्रमाणम्" इति । ततस्तस्यैव चारस्य द्वारा पत्रमतिसर्जयामास ।

ततो विदर्भाधीशः पत्रान्मगधेशोत्तरं विदित्वा कलुषितमतिः गृहिण्यै इमं वृत्तान्तं निवेद्य सचिवैस्सह मन्त्रयितुं सभां व्यधित । तत्र चतुरधीप्रभृतयस्त्रयो मन्त्रिणो राजानमेवमवोचन् ।

प्रथमः– "साम्प्रतं तस्करवृत्यवलम्बनेन मगधेशः स्वामिनि महत्यागसि विद्यते । तद्यथापराधं दण्डनीयो भवति । दण्डनं चायोधनादृते न सुकरम्" इति ।

द्वितीयः– "यद्यपि शूरसेनः क्षत्रियाचारसरणिमेवानुसृत्योढा सौदामनीति सविनयं प्रार्थयते । तथापि तदनुष्ठितो मिथ्याचार एव भवति, तस्मादयं शिक्षणीयः" इति । दण्डनी

तृतीयः–"स्वावनतिमनालोचयता मगधराजेनात्यन्तमनुचितमाचरितम् । इदानीमपि अपराधमनपराध इति समर्थयन् स शूरसेनस्तीव्रतरं शासनीयः । तथापि कन्याविषयकतयापराधस्य कन्यार्थिनौ मिथो योद्धारौ । तस्मादद्य विजयवर्माणं विजिगीषुं विधाय वयं साह्यकरणे बद्धपरिकरा भवामः" इति ।

कामपालस्ततः तृतीयसचिववचनं स्वाभिमतानुगुणं मन्यमानस्तमेवार्थं सिद्धान्तयित्वा विजयप्रस्थानाय विजयवर्माणमादिश्य स्वयमपि षड्विधबलेन सार्धं तत्साहाय्यसम्पादनोत्सुकः पत्तनात्प्रायासीत् ।

मान्याः विमृशत कामपालस्य साधुजनगर्हितं चरितम् । यः खल्वमात्याशयं स्वानुकूलं जानानस्सुतायाः भाव्यनिष्टशतमप्यनालोच्यानुपदमेव दण्डोपायायत्तस्संवृत्तः । मन्त्रिणां तु कौशलमिदमनिर्वचनीयम् । ये हि अनालोचितोदर्कां दण्डोपाय एव नृपं व्यापारयामासुः किल । ये सर्वशास्त्रनिष्णाताः न्यायमात्रपक्षपातिनो जलधय इवागाधाः, त एव मन्त्रिपदवीमर्हन्ति । न केवलं प्रभ्वभिप्रायानुरोधेन वक्तारो युक्तायुक्तविवेकिन एकान्ततो वेतनमेव परं मन्वाना अनभ्यस्तराज्यभारक्रमाः स्व-

कीयौन्नत्यमात्रकाङ्क्षिणः । अहो कामपालामात्यानां सुराचार्यमन्यमानानां बुद्धिवैभवम् । येन कदाचिदप्यपरिचितपुरुषे सौदामनी नानुरज्येत । अस्मद्दृष्ट्यगोचरं तयोः प्रेमकारणं किञ्चित् विद्येत इति कतमस्यापि चित्ते नाभासिष्ट । एवं सचिवायत्तमनीषस्य जामातर्यप्यकरुणस्य कामपालस्य विजयवर्मणा सह दण्डयात्रां चारमुखेन विज्ञाय मगधराजोऽपि युद्धसन्नद्धः समपद्यत ।

इति चतुर्थः परिच्छेदः

अथ पञ्चमः परिच्छेदः

"अहो! कल्पविरामसमयमेघनिर्घोष इवोच्छून आयोधनदुन्दुभिनिनादः श्रोत्रे विभेत्तुं प्रावर्तिष्ट । प्रतिभटहठोद्धृतखड्गसंरावो हृदयं वेपयति । दुर्गेषु सन्ततप्रज्वलदनलशिखारसनाः प्रत्यर्थिनरपतियशःपरम्परामास्वदन्त इव । मन्दानिलान्दोल्यमानपताकानिकुरम्बं प्रमोदेन मगधराजविजयं श्लाघत इव । अस्मत्कटकेषु तु निरन्तरं परशृशताः भटाः त्रिदशालयं प्रविशन्ति । गजाश्वसङ्ख्या च प्रतिदिनं हीयते । निरसूनां कायसमूहस्य पूतिगन्धेनोद्भूतैः क्रिमिभिः सम्भूतः साङ्क्रामिकरोगो भृशं भटान्बाधते । चिकित्सितुं च चिकित्सका अवसरमेव न लभन्ते । युद्धाय पत्तनात्प्रस्थितानामस्माकं वत्सरद्वयं व्यत्यगात् । एतावतापि कालेन दुर्गनिर्भेदेन मगधराजधानीमाक्रमितुं न प्रभवामः । चतुर्योजनदूर एव वर्तामहे । जयाशा च दिने दिने तनुतां याति । इतः परं यदि जोषमासीमहि + तदा प्रधानानामपि परिणामं निश्चेतुं न पारयामः । ततोऽद्यैव भूपतिर्विज्ञापयितव्यः" इति सेनापतिरधीरस्सन् शिबिरस्थं महीपतिं सत्त्वरमासाद्य वर्षद्वयं स्वानीकिन्याः सञ्जातां महतीं हानिं व्यजिज्ञपत् ।

तदा विजयवर्मा धीरोऽपि सञ्जातानर्थशतं पर्यालोच्य स्वपुर-निर्वर्तनमेव श्रेय इति विदित्वा मित्रादिभिर्मन्त्रयामास । शान्तिवर्मा च निजसैन्यदुष्परिणामं विज्ञाय नगरगमनं वरमित्यब्रवीत् । तदा सचिवे-ष्वेकतमो जराजर्झरितकलेवरः स्फलितंभावुकशिरोरुहो दूरदर्शी नाम प एवमागदीत् ।

"राजन्! कथमधीरतायां धियं निदधासि? । राजन्यप्रभवानां युद्धमेव कुलधनमिति न मनुषे? अद्य वयं प्राणभयात्पलायेमहि चेत्, तदावश्यमभिषेणनोद्युक्तात् प्रत्यर्थिनोऽनिशं भीतिमनुभवेम । तदिदानीं धैर्यमवस्थाप्य स्वात्मनि प्रबोधं पालय । वार्धककवलितस्यापि मम प्रभावेणान्तरैव श्वो निशां जयलक्ष्मीपाणिपीडनं करोषि" इति ।

तदा सर्वे "अयं वृद्ध उन्मत्तवत्प्रलपति, यदब्दद्वयं तीव्रवेगेन युद्धोद्यमवतामस्माकं अजय्यं द्विषन्तमेकस्मिन्नह्नि जेष्यामीति ब्रूते" इति परिजहसुः । नरेन्द्रः शान्तिवर्मा तु स्थविरस्य सामर्थ्यं परीक्षिष्यामह इति सर्वान् समाधाय शिबिरे जोषमास्त ।

माकीं निशायामेकघण्टासमय आसीत् । सर्वतः कालकराल-कृपाणसच्छायेनान्धतमसेन जन्तूनां नयनैस्सह हृदयान्यान्ध्यं प्रकट-यन्ति स्म । बहुविधसत्त्वसमाकुलोऽपि लोको निःशब्दताकाष्ठामवाप । अधिकभृतिसम्पिपादयिषया दिवानवरतकार्यकरणेन श्रमभरविक्लवाः शिथिलसन्धिबन्धाः कर्मकराः प्रसारितकरचरणा गाढसंवेशविवशाः निश्चेतना इव ददृशिरे । अभ्रङ्कषशिखरसौधोर्ध्वराजमानदीपशिखामात्रं रश्मिराशीनां स्वमात्रस्थिरतां ख्यापयितुमिव प्रभापुञ्जैर्दिशोऽतिमात्रं दीपयति स्म ।

अत्रान्तरे मगधराजधान्यामायुधालया आश्रयाशपरवशा नितान्तं प्रज्वलयितुमारभन्त । तद्विलोकनभीतमभ्यर्णनिबद्धं हस्त्यश्वं चीत्कुर्व-त्स्वबन्धनरज्जूरुच्छिद्य बन्धनागारं भञ्जयित्वा स्वच्छन्दं निर्गन्तुमुपा-

क्रमत । गुप्तद्वारकवाटं च स्वयमेव शत्रूणां प्रवेशायावकाशं वितरदिव दूरमुद्घाटितमासीत् । सपत्नबलानि च गोपुरद्वारेणैव प्राकारान्तः प्रविविशुः । एतस्मिन्नन्तरे निशातधिषणो नाम मगधराजामात्यराजो यामिकमुखेन सर्वामिमां प्रवृत्तिमवबुध्य तूर्णं नरपतिशयनवेश्म सम्प्राप्य राजानं प्रबोध्य "देव! सर्वनाशः सम्पन्नः । तदद्य सत्वरं सौदामनीं चाररूपपिहितनिजस्वरूपां विधाय राजपुरुषेणाप्रमत्तेन सह गुप्तद्वारेण-तत्रभवतो बन्धोर्वङ्गभूपतेः राजधानीं प्रेषय" इति व्यज्ञापयत् । तदा मनुजेन्द्रोऽज्ञाताकाण्डापदपि सचिवाग्रेसरवाग्वेगेन महतीं विपदमात्मनः सम्भाव्य तथैवाकरोत् ।

ततो मन्त्री एवमवादीत्– "देव, अस्मद्वलेषु कस्यचिदुपजापेन दुष्प्रवेशमप्यस्मत्पुरं वैरिभिराक्रमि । चिरं रक्ता जयलक्ष्मीश्च निश्चयेनास्मासु वैरस्येन वैरिणमरुन्तुदकार्यकर्तारमपि परिरब्धुमुत्सुका दरीदृश्यते । सर्वथा नः स्वस्ति न करिष्यति दैवमिति मन्ये । या च नगरी द्विषतां विजयाशां तेष्वेव जरयति स्म, सैवेदानीं तान् सहस्तलाघवं आत्मानं प्रवेशयतीव । कथञ्चिद्योद्धुमप्यायुधागारं राजद्रोहिणा दुरात्मना केनचिदग्निसात्कृतम् । तस्मादस्माकं विभिन्नवेषिणां पुरादस्मान्निर्गमादृते नान्यं कमप्युपायं चिन्तयामि । तत् त्वरस्वेदानीं प्रस्थातुं" इति । एतदाकर्णनेन खिन्नोऽपि मगधेश्वर आत्मनि धैर्यमवस्थाप्य, मन्त्रिणं प्रति "कथं निस्सत्त्व इव मयि पलायनं समर्थयन् षण्ढतां स्थापयितुं यतसे? क्षत्रियवीरकुलावतंसो मगधराजः कदाचिदपि प्राणपरायणो यशः कलङ्कयितुं न प्रयतते । न कोऽपि वीरस्सन् स्वर्गसोपानभूते जन्मसहस्रसञ्चितसुकृतशतलभ्ये सङ्ग्रामनिकषोपले स्ववीर्यनिकषणमन्तरेण पलायनमन्त्रं जपेत् । तदिदानीं युद्धसन्नद्धो भवामि । द्विषद्भटान्वारयितुमारभे" इत्युक्त्वा परिकरबन्धाय प्रावर्तत ।

तदा सचिवाग्रेसरेण "स्वामिन् यद्यपि भवत्सिद्धान्तो वरीयानेव, तथापि तस्यासमयोऽद्य, तत्सद्य एव निर्गन्तुं प्रयतस्व । अथ कर्तव्यं भणिष्यामि" इति सशपथं निर्बध्यमानो नृपांतिरमात्यवृद्धस्य हितोक्तिमुल्लङ्घितुमप्रभवन् तेन समं गुप्तद्वारेण निर्ययौ ।

अथ विजयवर्मवाहिन्यां प्रलयकाले सर्वतो वहन्त्यां वाहिनीपतिवारितत्यामिव मगधेशपुरं निःशङ्कं व्याप्नुवन्त्यामपि शान्तयुद्धप्रक्रमं प्रत्यर्थिबलमवलोक्य, राजधानीं निर्भूमिपतिं सौदामनीरहितां च निश्चित्य सेनापतिर्जयभेरीताडनपुरस्सरं विजयपिशुनां पताकां संस्थापयामास ।

ततो विजयवर्ममन्त्रिवरो दूरदर्शी जयलक्ष्मीपाणिपीडनं नरेन्द्रमुवाच । तदाकर्ण्य सर्वे तं प्रशशंसुः । विजयवर्मा परं स्वमनोरथमसम्पूर्णं मत्वा प्रमोदं निकामं नाव्यञ्जयत्, यतस्स सौदामनीलाभं परमपुरुषार्थममन्यत ।

कामपालस्तु निजतनयास्थितिमजानन्नत्यर्थं दुःखसिन्धुमवागाहत। एवं वासरद्वये व्यतीते, दुर्लभजयसम्पादकोऽमात्यवृद्धः शान्तिवर्माणं सविनयं व्यजिज्ञपत्– "देव, मगधराजधानीमिदानीमनरपतिं पश्यामि । मया तु जयात्पूर्वं शूरसेनस्य कनिष्ठजनन्यै प्रतिश्रुतं "द्विषज्जये यदि साह्यं क्रियेत, तदा तव सुताय धीमते प्रवरसेनाय राज्यं दापयिष्यामि" इति । राज्यलोभिन्या च तया तदूरीकृतं, येन मगधेशिता सुजय्यः समजनि । तदद्य मगधराज्यभारो यथा प्रवरसेनभुजमधिरोहेत् तथा विधातुमाज्ञापय मां" इति ।

शान्तिवर्मा तदवश्यपालनीयमपि स्थविरमन्त्रिवचनं नानुमेने । किन्तु धर्मपरिपालनधिया "शूरसेनस्य निरसुता यदि प्रबलप्रमाणेनावधारिता स्यात् तदा युवराजो राज्यमर्हेत् । तस्मात्प्रतिजनपदं सजीवस्य शूरसेनस्य समर्पयित्रेऽनुपदमेव पञ्चविंशतिसहस्ररूप्याणि दीयेरन् इत्यु-

द्घोषय" इत्यवोचत । सचिववृद्धस्स एकतो नृपत्यादेशेनान्यतः प्रतिज्ञात-कार्यानिर्वर्तनेन च भृशमुद्विग्न आत्मानं निन्दं निन्दं कथञ्चिच्चारमुखेन नरपतिनिदेशं प्रख्यापयामास । अथ शान्तिवर्मा जितमगधराज्ये निजामात्यं कञ्चिद्व्यवस्थापनाय नियोज्य ससैन्यः स्वपुरं प्रतस्थे ।

सहृदयाः ! अत्रान्तरा संवृत्तः कोऽपि वृत्तान्तः कथं वा भवतां विस्मयं न वितरेत् । शूरसेनस्य काचन कनिष्ठमाता कलावती नाम सकलेवरकुटिलनीतिरिव राजते स्म किल । तामेकस्तनयो नाम्ना प्रवरसेनोऽनिशं नन्दयति स्म । कलावती सपत्न्यपि पित्रोर्वियोगात्प्रभृति शूरसेनं स्वात्मजनिर्विशेषं पालयामास । तस्यापि तस्यां जननीवात्सल्यं ववृधेतराम् । एवं शूरसेने यौवनं प्रविशति प्रजास्तस्य स्कन्धं कनिष्ठजनन्यनुमत्या कुलक्रमागतां मगधराज्यधुरमारोपयन् । युवराजोऽपि प्रवरसेनः प्रधानसेनापतिपदेऽधिकृतो भ्रातरि सौमित्रिमैत्रीमवर्धयत् । एवं सति सम्प्राप्ते घोरे सङ्गरे कलावत्याः काचित्सखी कुटिलमत्यभिधा त्वरितमागत्य देवीं प्रति– "देवि ! कञ्चिद्रहस्योदन्तं साक्षाच्छृण्वन्ती कुलिशताडितेव बाढमहं सन्तप्ता तत्रभवत्युदर्कं चिन्तयन्ती तवान्तिकं सत्वरमागमम् । मदुक्तिस्स्वप्रयोजनकलङ्किता अतथ्यभूषितेति यदि ज्ञास्यसे, तर्ह्यहं यास्यामि यथापद्यम् ; किमनेनान्यदुःखचिन्तनेन जराशिथिलशरीरायाः मे" इत्युक्त्वा जोषतामासेवत । तदा राज्ञी सखीहितोक्त्याकर्णने नितान्तं कुतूहलिनी सप्रश्रयं तां सर्वं वदितुं मुहुर्मुहुः प्रार्थयाञ्चक्रे । मन्ये, लोके प्रायशः प्राज्ञा अपि एवं पिशुनवचनं विश्वसन्तीति । ततो भृशमर्थिता कुटिलमतिरित्थमाबभाषे ।

"राज्ञि ! पूर्वेद्युः सायं राजा सचिवेन निशातधिषणेन साकमेवं मन्त्रयते स्म । 'दिने दिने प्रवर्धमानः प्रवरसेनः सेनापतिकार्ये परं प्रावीण्यं भजत इति अमन्दानन्दस्थानं, यदस्मान्प्रतीपभूपालोऽहर्निशं सोद्यमोऽपि विजेतुं न शशाक । परन्तु कदाचिद्दायादमात्सर्येणास्माक-

मपि प्रतीपो भवेदिति सम्भावना पुनः बहुतिथात्कालान्मां बाधतेतराम् । एतस्मिन्कथमभिसन्धत्ते भवान्" इति ।

तदाकर्ण्य मन्त्री "देव! मया चिन्तितचरमेतद्यथार्थमेव, तथापि प्रचलति प्रभूते समरे, सेनापतौ भ्रातरि प्रच्युताधिकारे सति सहोदर-कलहं मन्वानाः सपत्ना उपजापमाचरेयुः । येन वयं सुजय्यास्सञ्जायामहे । ततो भविष्यत् कष्टमालोच्य साम्प्रतं तूष्णींभावं परिपाल्यायोधनावसाने 'राजपुत्रस्यापि सेनास्वामिकार्ये नियुक्तस्य तव महत्कष्टमापतितं, तदितः परं तस्माद्विश्रमय' इति विश्वास्य प्रवरसेनं विरतसेनापत्यधिकारं विधास्यामः, तावत्पर्यन्तं स्वच्छन्दं सेनायां विहरतु" इति प्रत्युवाच । भूपतिरपि तदेवानुमुमुदे ।

प्रियराज्ञि! शूरसेनः शूरस्याप्यनुजस्य प्रवरसेनस्य स्वराज्ये यं कञ्चिदप्यधिकारं न सहते चेदितः परं वार्धकसोपानारूढाया अबलायास्तव दासीपदं कथं न दद्यात्; यदि राजमहिषी भवती तत्तादृशीं दशां निर्विशेत्, तदा वयं कलावत्यालय इति लोके कथं वदिष्यामः । तद्यात्मनो हितमाकाङ्क्षसि चेत्, श्वो रजन्यामेव यथा मगधराज्यं परिपन्थिपरवशतामियात्, ततस्तव पुत्रो राज्याभिषिक्त एकान्ततो दुरितमाचरन्तं दुश्चरितं भूपालं दण्डयेत्तथा यतस्व । ततःपरं भवत्या भागधेयं प्रमाणं" इति । ततः तिष्ठ तिष्ठेत्युक्तापि द्रुततरं स्वमन्दिरं प्रायासीत् ।

अथात्मनो हितं चिन्तयन्त्याः, ज्येष्ठपुत्रे प्रकामं प्रेमवत्या अपि कलावत्याश्चेतो दन्तावलप्रविष्टसर इव नितरां कलुषितं किल्बिषकर्मणः पदं ददौ । यतस्सा तदानीमेवैकस्मिन्पत्रे किमपि विलिख्य गूढचारद्वारा तच्छान्तिवर्मवृद्धामात्यं निनाय । पुनश्च तस्यामेव निशायां वेषान्तरेण स्वयं स्थविरसचिवशिबिरमासाद्य विधास्यमानं कार्यं व्यवस्थाप्य स्वालयं निववृते । परेद्युस्सञ्जाते नाकिनिकायस्यापि विस्मयसन्दायिनि जन्ये नितान्तं श्रान्ते सेनापतौ प्रवरसेने निशायां स्ववेश्मनि गाढं निद्रा-

धीने सति सा सुतस्य पेटिकां गूढमुद्घाट्य गुप्तद्वारायुधालयादीनां कीलिकामपहृत्य स्वयमेव गुप्तद्वारकवाटमुद्घाट्य विविधशस्त्रपूरितनिकेतनं कृशानुसात्कृत्याज्ञातवृत्तेव संवेशपरवशतां प्राप । येनासदृशविक्रमस्यापि शूरसेनस्य शात्रवनिरोधो दुष्करस्सन् सर्वनाशो देशभ्रष्टता च सम्बभूव ।

ततः प्रवरसेनो भ्रातृवत्सलः सकलवार्तां विदित्वा दुष्कृतिकारिणीं जननीं नितरां सन्तर्ज्य तन्मुखावलोकनाज्जुगुप्सितः स्वयमपि राज्यं परित्यज्य भ्रातृवर्त्मानुवर्ती समजायत ।

इति पञ्चमः परिच्छेदः

अथ षष्ठः परिच्छेदः

"अहो वर्षास्वप्यत्रेतरर्तुसम्पदो विशेषतो वर्धन्त इव । मधुर्मधुव्रतानां वर्षातिबृंहणेन निरशनानां जीवनापायं शङ्कमान इव पुन्नागमल्लिकादिप्रसूननिवहं नितान्तमुपायनीकरोति । आपगाश्च विमलाभिरद्भिरमान्तमानन्दं देहभृतां वितन्वानाः नितरां चकासति । आजन्मसिद्धंविरोधमुत्सृजन्तश्शार्दूलाः धेनुभिस्सौहार्दं सम्पादयन्ति । स्वभावभीरवोऽपि हरिणा अपरिचितमर्त्यावलोकनान्न त्रसन्ति । अये ! अनतिदूरे ध्वनिरिव श्रूयते । अस्तु अभ्यर्णं प्राप्स्यामीत्युपकण्ठमेत्य, अहो अनिशं श्रुत्यर्थविमर्शपराणां श्रुत्यन्तपारदृश्वनां ब्रह्मैकनिष्ठानां मुनिपुङ्गवानां शास्त्रार्थविचारकोलाहलाः । सदा गुरुशुश्रूषानिरतानामन्तेवासिनां अध्ययनपाटवप्रकटनायैवाहमहमिकया वेदाध्यनचातुर्यं च । साम्प्रतं विविधवनगिरिदुर्गसञ्चारश्रान्तेन मया सम्प्राप्ता नयननिर्वृतिः । मन्वे दिष्टं मे फलोन्मेषणनैपुण्यमुद्गिरतीति । तन्महात्मनामेतेषां मध्ये हुताशनेनेव

दीप्यमानेन मुनितल्लजेन मेऽनिष्टपरम्परा शान्तिमियात् । यदस्मिन्नेत्र-पथमाक्रममाणे हृदयं प्रमोदाय पदं ददाति । भवतु तमेव शरणमुप-गच्छामि" इति आत्मनि वदन् "भगवन्, आत्रेयो मगधराजस्य कनीयान् तनयो नाम्ना प्रवरसेनोऽभिवादयते" इति यथाविधि अभि-वाद्यातिष्ठत् । तपोधनस्त्विममवलोक्य करतलामलकवदवगताखिलवृत्तः सस्मितं "राजकुमार! वृणीष्वेमं मदीयं वरं; येन त्वमन्तरासम्भाव्य-मानामन्तरायसन्ततिं सन्तीर्याचिरेण भ्रातरमुपलप्स्यसे" इत्यभिधाय वरमदात् । राजकुमारस्तावद्वरं स्वीकृत्य प्रमुदितो भूयस्तापसं नमस्कृत्य स्वेप्सितसम्पादनाय प्रतस्थे ।

इतो वङ्गराजधानीभूषणायमाना सौदामनी यातेषु परश्शतेषु वासरेषु भर्तृवियोगमसहमाना, तदुदन्तं च प्राणिमात्रादप्यजानाना क्लेशा-तिशयमनुभवन्ती पातिव्रत्यभङ्गभीता किमपि कर्तुमक्षमा अन्ततो धीरा सती पुरुषवेषेण स्वकार्यसाधनं वरममन्यत । तथैव सा वङ्गाधिपमामन्त्र्य धृतपुंनेपथ्यया कयाचित्सख्या साकं करधृतपेटिका रत्नव्यापारमिषेण विदर्भजनपदमुपाजगाम । तत्र कस्यचिच्छ्रेष्ठिनो धननन्दननाम्नो वेश्म-न्युवास ।

एवं सति शूरसेनो मन्त्रिद्वितीयोऽनेकभूभ्रमणेनातिवेलं श्रान्त-स्तत्रैव कस्यचिद्दीननाथाभिधस्य सत्रपतेरगारे निवसति स्म । धन-नन्दनदीननाथनिकेतने एकेनैव सदनेनान्तरितेऽवर्तेताम् । श्रेष्ठिवेषं बिभ्राणा सौदामनी, प्रातिवेशिकं मनोरथसर्वस्वं प्रेयांसं स्वाधीनं सन्तं विदित्वापि निजस्वरूपप्रकटनेनानर्थशतं मन्यमाना प्रत्यहं दर्शं दर्शं निज-भागधेयं निन्दति स्म । गुप्तसहजनृपतिनेपथ्यो मगधेशोऽपि प्रतिदिनं निशायां कर्तव्यमन्त्रणायामात्येन सह नगरात्किञ्चिद्दूरवर्तिनमारामं गत्वा मन्त्रालोचनेन किञ्चित्कालं यापयति स्म । एवमेव सौदामन्या-स्तत्रागमनानन्तरं पञ्चदशदिनानि व्यतीयुः ।

अथ कदाचित्पूर्णिमारात्रौ निशाकरः करनिकरैः कुमुदिनीरानन्दयति स्म । परिसरसरसि सरसीरुहनालकवलननिरतमरालाः कमलैस्सह मौनव्रतमाचरन्ति स्म । समीरश्च सरसीमाश्लिष्यन् कुमुदिनीश्च चुम्बन् मन्दमाववौ । नातिदूरारण्यनिवासिनश्च करेणवो यूथपानुसारिणस्सलिलपानायय थानुरूप्यं सङ्घशः सरः प्रति प्रययुः । एतस्मिन्नवसरे शूरसेनोऽनिशं सचिवद्वितीयोऽपि अस्मिन्नहन्ययममात्यस्य कार्यान्तरव्यग्रतया स्वयमेक एव ज्योत्स्नां सार्थयितुमिव ग्रामाद्वाहीकमुपवनं विवेश । तत्र चैकदृषत्फलके आसित्वा स्वदैवमुपालभमानः साश्रुनयनो मुहुर्मुहुस्सौदमनीं ध्यायन् किञ्चित्समयमयापयत् ।

अत्रान्तरे काचिदवगुण्ठनवती रमणीमणिर्वपुःप्रभया चन्द्रिकाश्चकासयन्ती पुरतस्तस्थौ । झटिति स नयने उन्मील्यापश्यत् । सद्यः तां हृदयादवतीर्णां सौदामनीं मेने । परं तु तादृक्षदर्शनसुखमनुभवितुं न प्राभवत् येनाश्रूणि नेत्रे निरुन्धन्ति स्म । अवगुण्ठनतिरोहितशरीरतया बहुदिवसविरहेण च स्वप्रेयसीति निश्चेतुं नाशकत् । किं तु केवलं नारीरत्नमित्येवावदधार । एवमेकस्मिन्मुहूर्ते व्यतीते सौदामनी वल्लभस्यात्मन्यनुरागं नायिकान्तरारतिं च परीक्षितुं व्यत्यस्तकण्ठा "पुरुषकुञ्जर! या पञ्चदशदिनादविरतं त्वामेव चिन्तयन्ती दैवदुर्विपाकेन क्षणमपि वर्षं मन्यमाना दिवसानतरत् सेयमबलाद्य सन्निहिता । एनां स्वहृदयकोशेऽवकाशं वितीर्य भवान् कृतार्थयतीति विश्वसिमि" इति विज्ञाप्य लज्जानम्रानना महीमङ्गुष्ठेन विलिखितुमारेभे ।

नृपतिस्तु कामिलोकसङ्कल्पसङ्कलनायेव चतुराननेनानिदम्पूर्वलावण्यसामग्रीसमग्रतानिर्मितामतुलसौन्दर्यनिधिमबलामणिमवेक्ष्य "अबले! सौदामनीजानिर्मगधनाथः कामपि दुरितसहस्रसम्प्राप्तकष्टपरम्परां निर्विशन्नपि स्वप्नेऽपि मनोरथसर्वस्वं तां वियोगिनीमन्तरा न कामपि रमणीमाप्तिं ध्यायति । तदद्य मनोरथसम्पिपादयिषया अधर्मपद्यामाक्रामन्ती मां पर-

स्सहस्रसंवत्सरभोग्ये पातके मा पातय । कुलस्त्रीणामिदमनुचितं, यत्स्वच्छन्दानुवर्तनम् । तन्निवर्तस्व यथावर्त्म । शिवास्ते पन्थानस्सन्तु" इत्यभिधाय विवलितवदनोऽभूत् ।

अथ दिनशतानुभूतासुखसन्ततिरपि सौदामनी प्रियस्य धीरतां, तादृशाचपलतां च विभाव्य प्रमोदसागरे मज्जन्ती अवगुण्ठनाम्बरं निरस्य, "प्राणप्रिय, जानीहि मां भवदर्धाङ्गीं सौदामनीं, या हृदयेशस्य, चिरविरहममर्षयन्ती निर्भाग्यमूर्तिर्वङ्गदेशं परित्यज्य वयस्यया सह भवद्वार्ताविज्ञानाय श्रेष्ठिवेषेण विविधदेशान् पर्यट्यात्र नगरे युष्मद्वासोदवसितनेदीयसि निकेतने पञ्चदशदिवसेन वसति" इत्यब्रवीत् ।

इमां वाचमाकर्ण्य शूरसेनस्सम्मदभरभरितो दीर्घविरहतपःफलसम्पादनायाभिमुखं भागधेयमभिष्टुवन् यावत्प्रेयस्यनुनयपरस्समजनि तावद्दक्षिणेनोद्यानमार्तध्वनिरश्रूयत । सपदि स आर्तत्राणपरायणो राजन्यो युवा विरम्यानुनयात् कान्तां निकेतनगमनायादिश्य विपन्नावनायाधावत् । सौदामनी तु भग्नमनोरथा तत्र स्वस्थितिमशुभोदर्कां मन्यमाना कथञ्चिद्धननन्दनसदनमभिययौ ।

शूरसेनस्त्वरितमार्तनिनादिनीं दिशमभिगम्य, वक्षस्येकचरणं विन्यस्यापरेण क्रव्योत्कीर्म्मननैपुण्यप्रकटनोद्युक्तेन मृत्योरपि साध्वससन्दायिना सिंहेन वध्यमानं युवानमद्राक्षीत् । सद्य एव स क्षत्रियवीरो बाहुबलेन पञ्चास्यं मृत्युसात्कृत्य निश्चेतनं युवानं कमपि सपदि शैत्योपचारेणचेतयामास । किरण

अथ स युवा प्राणदातारं निसर्गधीरं वीरपुरुषं निर्निमेषं निरीक्ष्य क्षणाज्ज्येष्ठभ्रातेति निर्णीय स्वनामगोत्रोच्चारणपुरस्सरमभ्यवादयत । शूरसेनस्तं रक्तसिक्तकायं निनादेनानुजन्मानं निश्चित्य सानन्दाश्रुराश्लिष्य सगद्गदं "वत्स! कस्मादेशादिदानीमागतोऽसि? कुत आत्मेदृशीं दशां प्रापितः? अपि कुशलिनो मगधेषु मात्रादयः" इत्यनुयुयुजे ।

स किञ्चिद्विश्रम्य पुरपरित्यागादारभ्योदन्तमित्थमकथयत् "यदा मगधराजधानी प्रियनरपतिवियोगादतिवेलं ग्लानिमियाय, तदैवाहं सर्वनाशस्यापि मे मातैव मूलमिति तद्वाचैव मत्वा जनन्या अपि ईदृश-दुरितनिदानभूतायास्तस्याः विलोकनमप्यनिष्टफलमवधार्य पत्तनान्निरगाम् । तदनु प्रत्यहं सहोदरानन्दसमुन्मेषणचणस्य भवद्वदनारविन्दस्य सन्दर्शनाभावेनात्यर्थं दुःखातिशयक्लान्तस्त्वदन्वेषणायै नानाजनपदवन-गिरिदुर्गेषु सञ्चरन् किञ्चिदरण्यानीमध्येऽगणितान्तेवासिसंसेवितं मध्यमभुवनावनाय मर्त्यलोकमवतीर्णं चतुराननमिव तपोधनाग्रगण्यमुपासीदम् । दृष्टिपथमुपगते मयि स महात्मा अतीन्द्रियज्ञानवान् तपस्वी मदभिलाषमभिज्ञाय विहितप्रणामं मां 'राजकुमार, वृणीष्वेमं मदीयं वरं येनान्तरासम्भाव्यमानान्तरायसन्ततिं सन्तीर्याचिरेण भ्रातरमुपलप्स्यसे' इत्युक्त्वा वरमदात् । अवनतमस्तकोऽहं तदनुग्रहेण लब्धं वरं शिरसा वहन् धीरस्सन् विपिनसरणिमेवावलम्ब्य तत्रभवन्तमनुध्यायन् प्रातिष्ठे । यातेषु केषुचित्क्रोशेषु किञ्चिन्निशाचरपतिपुरमगमम्, यत्र तस्य राक्षसराजस्य कन्यायाः परिणयः प्रचलति स्म । दिदृक्षया चाहं तेषां वेषं धारयित्वा वधूबान्धवसमूहं प्राविशम् ।

तत्र केचिन्निशाचरा अजमहिषधेन्वादीन् पिशितस्य कृते निजघ्नुः । केचिन्मांसं सुष्ठु वारिणा प्रक्षाल्य पाकस्थानं प्रापयामासुः । केचित् तैः नानाविधभक्ष्यभोज्यपेयानि कृत्वा बन्धुभ्यः पर्यवेषयन् । केचन कुम्भैः कूपादप उद्धृत्य महानसं मज्जनगृहं च निन्युः । केचन अतिथ्यभ्यागतादीन् सहस्तलाघवमनुरूपस्थानेषूपवेशयामासुः । एतेष्वहं सलिलानयनाय नियोजितो विवाहक्षणानन्दपरवशतया न कैश्चिदपि व्यज्ञायिषि । एवमवसितेषूत्सवेषु जामातृपक्षीयेभ्यः श्वशुरस्सबहुमानं सहभोजनमहोत्सवं कारयामास । तदा मिलितेषु रजनीचरेषु कश्चित्कुशाग्रधीश्चेष्टाभिर्मां मानवमवजगाम । ततः स सर्वक्रत्यादेश्यो मानुषो-

ऽयमिति निर्देशयामास । सद्यस्सकलास्ते सङ्घीभूय 'मानुषोऽयं प्रतारयितुमस्मद्व्यूहेष्ववात्सीत्, तदद्यैनं निबध्य पाकाय पाकस्थानं नयत' इति भृत्यानादिदिशुः ।

अथो ते मां दैवदुर्विलसिताधीनं दृढतरं रज्जुभिराबध्य महानसं नीत्वा प्रधानौदनिकपरतन्त्रमकार्षुः । दिष्ट्या सोऽपि वञ्चितनिशाचरो मानवः, सजातीयतया मां परिपिपालयिषुरवकरनिकरैस्सह दूरं निस्सारयामास । अहं तु तापसवरवरप्रभावमात्मनो भागधेयं च स्मारं स्मारं सुदूरमरण्यं परिभ्रमन्नपहसितामरनाथसमधिष्ठितसुरनगरीं पुष्पपुरीं नाम नगरीमद्राक्षम् ।

यस्यां तावत्प्रद्योतमानगरुत्मन्मणिप्रत्युप्तभित्तिनिवहानि हर्म्याण्यम्बुदमण्डलसौहृदं सम्पादयितुमिवाम्बरं व्याश्नुवते । भगवान् कुमुदबान्धवोऽपि तारुण्यारम्भोच्चलल्लावण्यपण्यानां रमणीमणीनां आननैर्निर्जित्य बन्दीकृतः प्रासादशिखरदेदीप्यमानदीपमिषेण नित्यनिवासमाचरति । किं बहुना सर्वदा धनराशिसमारोहिणो धनिनो यत्र धनदमपि न्यक्कुर्वन्ति । अहं तु तन्नगरसौभाग्यस्यावलुलोकयिषयैकदिनं तत्परितो भ्रान्त्वा समग्रतया द्रष्टुमपारयन् परिश्रान्तः कस्यचिद्धनिकस्य वेश्मनो बहिर्वेदिकायामस्वाप्सम्, येन गाढनिद्रापरिभूत आप्रभातं न कञ्चन वृत्तान्तमज्ञासिषम् । प्रगे तु प्रबोधानुपदमेव राजभृत्याः कस्यापि वृत्तान्तस्यावेदिनमपि मामपराधिनं मन्यमानाः दृढं करौ निगडयित्वाधिकरणकाभ्यर्णं निन्युः । पश्चादहं तस्मिन् न्यायस्थाने मिलितानां लोकानां मुखात् यत्राहमनिद्रां, तन्मन्दिरस्वामिनं रजन्यामेव स्तेना निहत्य तस्याशेषरिक्थान्यचोरयन्निति, तेषु चोरेषु अहमेकतम इति मत्या मां राजपुरुषा अक्षदर्शकसमीपमनैषुरिति चाज्ञासिषम् । एतद्विदित्वात्यन्तं चकित इतिकर्तव्यतामूढस्तब्धश्चाहं प्राड्विवाकप्रश्नस्य यदा सम्यक्प्रत्युत्तरदाने नाशकं, तदा स मद्वचनभेदेन मां मलिम्लुचं निर्णीयापराधानुरूपं दण्ड-

मारोप्य घातुकपुरुषान्वधायादिदेश । ते मां वध्यपुरुषोचितमालया मण्डयित्वा मारणयन्त्रालयमनयन् । ततो यदा हननाय यन्त्रं संयोज्य प्रैरयन् तदा तद्भग्नं सद्भूतलेऽपतत् । तस्मात्ते 'स्खलितयन्त्रघातो न वध्यः' इति नियममनुसृत्य सपदि वार्तामिमां न्यायाधिपतये न्यवेदयन् । सोऽपि तन्नीतिं प्रतिपद्य मां विसर्जयामास ।

अथाहमेतद्भाग्यविपर्ययेऽपि महापदस्त्रातारं तपोधनानुग्रहं भविष्यदित्याहितेऽपि त्वमेव शरणमिति पुनः पुनः ध्यायन् तत्रभवतो बहुकालवियोगमसहमानस्ततः प्रस्थाय विपिनवर्त्मनि ईदृग्विपद्भाजनमभवम् । परन्तु परिणामे आपदपीयमभीप्सितार्थसम्पादनेन कल्याणात्मना परिणतामेति महदिदं प्रमोदस्थानम्" इति । शूरसेन उत्तीर्णविपत्परंपरं भ्रातरं भूयो भूयोऽभिनन्द्य, तेन सह निशायामेव दीननाथालयमवाप्य वसति स्म ।

इति षष्ठः परिच्छेदः

अथ सप्तमः परिच्छेदः

माकीमष्टघण्टाकालः । उद्भिन्ननळिनानि सर्वतः आमोदभरेण जनानामोदयामासुः । कृताहाराः कृषीवलाः सलाङ्गलयुगेषु बलीवर्दान् निबध्य केदारान्कर्षन्ति स्म । अत्रान्तरे कश्चन राजदूतः सत्रपतिं दीननाथमुपगम्य राजाज्ञाकरम्बितं पत्रं प्रदर्श्याधिकरणस्थानागमनाय निर्बबन्ध । आज्ञा चैवमविद्यत—"पत्रालोकनानुपदं न्यायस्थानं समधिगन्तव्यम् । येन भवता वर्षद्वयात्प्राक् कस्माच्चिदुत्तमार्णादशसहस्ररूप्याणि ऋणतया परिगृह्येतः पूर्वं वारं वारं प्रबोधितेनापि नार्पितानि । यद्यद्यापि गृहीतधनं न प्रत्यर्पयेः तदा अवश्यं ऋणानुगुण्येन दण्डतया विहिताः दिवसाः कारागारे

नेतव्याः" इति । तदा सोऽकिञ्चनतया ऋणापनोदनाय मार्गान्तरमपश्यन् अन्ततः शिक्षानिर्वेश एव शरणं बुध्यमानः पत्नीपुत्रादीनामन्त्र्य राजभृत्येन समं न्यायस्थानमेवागमत् । वराकी अन्तर्वत्नी अनन्यशरणा भार्या तु अत्यर्थं दुःखिता मुमूर्छ ।

पश्यत नियतिदुर्विलसितम् । यः खलु दीननाथः सत्रपतिः परस्सहस्रदीनानाथान् प्रत्यहं अशनवसनादिदानेन चिरेण पालयति स्म । आगर्भश्रीमांश्च सोऽधःकृतबलिः निजद्रविणराशीन् सर्वान्दुर्गतायत्तान् विधाय स्वयमेव दौर्गत्यमीदृशमपद्यत । येनान्ते कारावसतिस्तादृक्षदानस्य फलात्मना पर्यणंसीत्। विधिश्च परीक्षते एतादृशदारिद्र्यदानेन दानशौण्डान्। हन्त! ईदृशनिस्सीमदुरवस्थाभाजमप्येनमनेकसहस्रोपजीविष्वेकतमोऽपि मूर्धानमुद्धृत्य नालोकिष्ट । प्रायेण जगत्याढ्याकिञ्चनतयोरीदृशी भिदा दृश्यते । आर्तानां त्रातापि शूरसेनस्तस्य कथमपि साह्यं कर्तुमपारयन् भृशं शुशोच ।

एतस्मिन्नन्तरे रथ्यायां किमपि घोषयन्ति स्म । प्रवरसेनस्तं ध्वनिमवहितः शुश्राव । स चेत्थमासीत्– "यः खलु मगधभूपतिः शूरसेनो बहुतिथात्कालाल्लोकलोचनागोचरः केनाप्यविदितवार्तश्च; तं सजीवमर्पयित्रे पञ्चविंशतिसहस्ररूप्याणि दीयन्ते" इति ।

अथेमां घोषणां स्वानुकूलां मन्यमानः प्रवरसेनोऽग्रजन्मानमेवं व्यजिज्ञपत्– "आर्येदानीं सत्रपतिर्दीनः ऋणदानासमर्थो न्यायस्थाने खिद्यते । अवश्यमनुभवितव्यं च तेन द्रव्यानुगुणो दण्डः । एते कलिङ्गराजभृत्याश्च भवन्तं समर्पयित्रे पञ्चविंशतिसहस्ररूप्यदानं प्रतिशृण्वन्ति । समानाकारयोरावयोर्व्यत्ययं न कोऽपि ज्ञास्यति, तन्मां राजभृत्येभ्यस्समर्प्यात्यन्तदीनं दीननाथं शिक्षणात् त्रायस्व" इति ।

तदिदं वचोऽनुजन्मन आकर्ण्य, तस्य भ्रातृवात्सल्यं दीनशरणतां च विभाव्य नितरामभिनन्दितोऽपि शूरसेनस्तस्यैवंविधं सङ्कल्पं नान्वमनुत । किं तु स्वयमेव तत्कार्यं निर्वर्तयितुं सङ्कल्पितवान् ।

अपूरितमनोरथस्तु प्रवरसेनो भ्रातरं पुनः पुनरेवं प्रार्थयामास – "आर्य! बालकोऽयमाग्रही निर्बन्धातीति मा मंस्थाः। शात्रवनिवहेषु निपुणतरं वर्तितुं शक्त इति जानीहि। भवानेव सत्रपतिमोचनाय यतेत चेत्तदा महाननर्थस्सम्भवेत्। अभिलषितकार्यं च न सिद्धयेत्। तदस्मिन् कर्मणि उत्सुकं मामेवाज्ञापय। अयं जनः कथमपि तत्र न प्रभवेद्यदि तदा साहाय्यविधानोद्युक्तो भवान् जागर्त्येव" इति।

अथ शूरसेनः कृच्छ्रेण भ्रातृप्रार्थनां प्रतिपद्य, तं कलिङ्गराजभृत्येभ्यः समर्प्य द्रव्याणि जग्राह। ततश्च दीननाथस्य सहधर्मिणीद्वारा उत्तमर्णाय ऋणं दापयित्वा सत्रपतिं मोचयामास। स्वप्नेऽपि दानरूपेणागृहीतपरधनो दीननाथ एनां वार्तां जनमुखाद्विज्ञाय भार्यायै भृशं प्रकुप्यात्मानमतिमात्रं निनिन्द।

सहृदयाः! पश्यत दीननाथस्य धर्मबुद्धिं, यो जीवितावसानेऽपि परस्वाय न स्पृहयति। एवं निर्मोचिते सत्रपतौ, प्रस्थिते च कलिङ्गराजधानीं प्रवरसेने द्वित्राः वासराः व्यतीयुः।

एतावति नृपतिभृत्यास्सहर्षं प्रवरसेनं शूरसेनधिया कलिङ्गभूपालाय समर्प्य वृत्तं सकलमाचख्युः। तदा शान्तिवर्मा तस्यानितरसाधारणमाकारं, विस्मयावहगाम्भीर्यमुद्रां निश्चलदृष्टिं च मुहुर्मुहुर्नयनपुटेनापीय पुलकितगात्रोद्भुतसिन्धौ ममज्ज। अन्ते तं शूरसेनमेवावधार्य नयनाभ्यां प्रेमरसं स्रावयन् सानन्दमेवमभाषत– "महापुरुष! अनात्मज्ञेन मया कापुरुषसाधारणतया महानपराधो भवत्यकारि। प्राज्ञेन त्वया तत्सर्वं विस्मृत्य कापि मैत्र्यस्मिञ्जने विधातव्या। कतिपयदिवसानत्रैवास्मानानन्द्य भवद्राज्यं पुनः प्रतिपत्तव्यं" इति। प्रवरसेनस्तादृशस्यापि भूपालस्य साधुतां नयसरण्यनुसरणं चात्यर्थं श्लाघित्वा, तथेत्यङ्गीकृत्य तामेव राजधानीमध्युवास। एवं प्रेमभरधुरन्धराभ्यां ताभ्यां केचिद्दिवसास्तत्रानायिषत।

इतो मगधभूपतेश्शूरसेनस्य राज्यभ्रंशात्, मातरमवमत्य प्रवरसेनस्य भ्रातृस्नेहसम्पूरितान्तःकरणस्य राष्ट्रनिर्गमाच्चारभ्य शूरसेनवृत्तान्तावबोधे, प्रवरसेनमार्गणविषये च कलावत्याः स्थविरसचिवस्य दूरदर्शिनश्चान्योन्यं कुशलोदन्तविज्ञानव्याजेन संवृतपत्रातिसर्जनकार्यं निपुणं चलति स्म ।

अथैकदा दूरदर्शी प्रवरसेनशान्तिवर्मणोः परस्परप्रत्यर्थिनोरपि निरवधिकप्रेमाणमात्मानिष्ठोदर्कं सम्भाव्य कलावत्यै एवं पत्रं विषयेणापूर्यं दूतद्वारा प्रैषयत्—

"उत्खातकण्टकः कामं भूयो मर्मणि रोहति ।
मन्ये मदपि ते राज्ञि वेदनामधिकेत्यहम्" ॥ ५ ॥ इति

कलावती तु पत्रसन्दर्शनानुपदमेव चकितचेताश्चारमुखेन "मन्त्रिवर्य, आवयोस्सम्भाषणाद्दते बहवः कालाः निर्गताः । तस्मात्परश्वस्तत्रभवता सार्धं सँलापमभिलषामि" इति वार्तामतिसर्जयामास ।

अथ परेद्युः दूतद्वारा विदितकलावतीसन्देशस्सचिववरो दूरदर्शी राजकार्यनिर्वर्तनापदेशेन सङ्कल्पितसंसिद्धये शान्तिवर्मानुज्ञां गृहीत्वा मगधदेशं प्रस्थाय सद्यः चिन्तानिमग्नां कलावतीमद्राक्षीत् । सा सविग्रहां कार्यसिद्धिमिव तमवलोक्य यथोचितं सम्पूज्य सविषादमेवमभाषिष्ट— "सचिवशेखर, तदिदानीं विफलमिति मन्ये, यद्भवता प्रतिश्रुतकार्यसम्पादनाय यतमानेन कृतज्ञेन व्यधायि । तत्साम्प्रतं यथा शूरसेनो मृतिमुपगच्छेत्, यथा च प्रवरसेनो मगधराज्यमनुरक्षेत् तथा यतितव्यं" इति ।

तदाकर्ण्य धिषणान्यक्कृतधिपणो दूरदर्शी मुहूर्तं विचिन्त्येत्थमुपायमगादीत्— "भाविनि कृत्तिकोत्सवदिवसे जनेशः शान्तिवर्मा राजधान्या दूरवर्ति क्रीडोद्यानमुपयाता । तमनुगन्तारश्च मन्त्रिमित्रबान्धवादयः । तदा यथा विना शूरसेनं नरपतिः, अन्ये च क्रीडोद्यानमुपगच्छेयुः,

यथा च शूरसेनो नानाविधघातुकपालितं निखिलदेहिजीवितावसानं वध्य-पदमुपयायात्, तथा जागरूकैर्भाव्यं" इति । राज्ञी समाकर्ण्येमां युक्तिं पुलकितकाया तं, तस्य धियं चातितरां प्रशस्य कार्यादस्माद्यथा स न प्रमाद्येत्, तथा पुनः पुनः प्रबोध्य पुरनिवृत्तयेऽनुमेने ।

अथ दूरदर्शी निजपुरि स्वनिकेतनं सम्प्राप्य कृतनित्यकर्मा निशायां सकलमालोच्य स्वयमेव प्रभाते वध्यस्थानमुपेत्य तदधिपतिमेवमादिदेश— "श्वः प्रदोषपर्यन्तं यः को वा यदि वध्यस्थलं प्रविशेत् सोऽविचार्य राजाज्ञां शिरसि निधाय सद्यो मारयितव्यः । यद्यत्र किञ्चित् स्खालित्यं पदं निदध्यात्, तदा यूयं सर्वे दण्डार्हाः भविष्यथ" इति ।

वध्यस्थानाधिपतिस्तु मन्त्रिवरस्याकाण्डागमनात्, तस्य सकोपमादेशाच्च आत्मानं कृतापराधमिव मन्यमानः 'यथादिशति मन्त्रिपुङ्गवः' इति तन्निदेशमभ्युपागमत् । इत्थं परेद्युः प्रभाते विहारापदेशेन सोऽमात्यः सर्वबन्धुभिः परिवृतं शान्तिवर्माणं त्वरयन् क्रीडोद्यानाय प्रस्थापयामास । अत्रान्तरेऽनिशं सहवासिनमपि तस्मिन्दिने कार्यान्तरपरतन्त्रं प्रवरसेनं कालविलम्बमसहमानो नरपतिस्त्वरितागमनायाऽऽदिश्य स्वयं सदागतिगतिना रथवरेण क्षणेनैव क्रीडोद्यानमगमत् । अथ रन्ध्रान्वेषी दूरदर्शी स्यन्दनान्तरे प्रवरसेनमेकमेवोपवेश्य दत्तसंज्ञेन सारथिना वध्यदेशं प्रति प्राहिणोत् ।

अयि भोः लोकाः पश्यत! कलावत्यास्सङ्कल्पितार्थपारदृश्वतां स्वार्थपरायणातां च । येन सा स्वकीयं सुतमपि प्रवरसेनं शूरसेनमनीषया जिघांसति । अहो! प्रवयसोऽपि कृतज्ञस्य दूरदर्शिनस्तत्रानुकूल्यम् । निखिलमपि हतविधिना सङ्घटितम् । द्रक्ष्यामस्तस्य चातुर्यं पुरस्तात् ।

एकत्रारामे शान्तिवर्मा सबन्धुवर्गः प्रवरसेनस्यागमनं प्रतिपालयति स्म । विहाराय सज्जितानि वस्तून्यात्मसाफल्यमकामयन्त । इतः

प्रवरसेनोऽसकृदवलोकितारामसरणिः सारथौ वध्यस्थानवर्त्माश्रयति तं कापथावलम्बिनमिव जानन् मानस एवं प्रदध्यौ– "कथमयमाराम-मार्गमपहायान्यस्मिन्नध्वनि स्यन्दनं नुदति । अथवोत्कण्ठया विक्षुभित-चित्तस्य मे तथा विभाति । आहोस्विदयमेव नूतनसारथिरुपवनसरणि-मविदन् मार्गान्तरमापन्नः । यद्वा रन्ध्रान्वेषिभिररिभिः प्रचोदितोऽयं मामतिसन्धत्ते । भवतु, पश्यामः" इति । एवं किञ्चिदूरं गते सति नून-मयं वराकोऽमार्गगामी, उद्यानपद्यां सुतरां विहाय वध्यभूमिपरिसरं सरति खलु । उन्मत्तमिमं प्रबोधयामीति क्षत्तारं प्रति "सारथिकुला-वतंस! कुत्रेदानीं शकटं ढौकयसि" इत्यप्राक्षीत् ।

स तु "क्षत्रियकुमार! प्रभोः शान्तिवर्मणो वृद्धामात्यस्य दूर-दर्शिनो निदेशेन रथं वध्योद्देशं नयामि । स खलु सचिवाग्रेसरोऽनु-ल्लङ्घ्यशासन उषस्येव मामाजिज्ञपत्– 'सारथे वज्राङ्ग! अद्यैव सपरि-वारं राजानमारामं नीत्वा रथान्तरेण त्वरितं शूरसेनं वध्यस्थानं नय' इति । सन्दिहानश्च मयि पुनराज्ञोल्लङ्घने दण्डं निर्देशितवान् । तन्मयेदानी-मनुष्ठीयते" इत्यवोचत् । श्रुतमात्र एवातिमात्रं क्रुद्धोऽपि शूरसेननाम्ना प्रथितः प्रवरसेनः स्वयं धीरतयाखिलविपत्सन्ततिमपि एकपद एव सन्तरिष्यामीति मत्या जोषमासीत् ।

अनयदेव स्यन्दनमनुपदं शूरसेनं वध्यभूमिम् । राजकुमारस्त्व-व्याकुलमतिरेवावर्तत । परं तु तत्रैकत्र गोमायुभिस्समांसोत्कीर्णनं आकृष्य-माणानि मारितमानुषशरीराणि, अन्यत्र घातुकैर्निर्दयं वध्यमानाः मान-वाश्च मानसेत्यर्थमुद्वेगमजीजनन् । तथापि प्रवरसेनो विधिदौरात्म्यं दुःखान्तं मन्यमानश्चेतसि सर्वेशानं सस्मार । क्रमेण निवृत्तबाह्येन्द्रिय-विषयः स्तब्धतां भेजे । तदात्वे घातुकाधिराजोऽस्यानुपमं क्षात्रं धीरतां च विलोक्य दयार्द्रहृदयोऽपि आत्महतिभीत्या सचिववरस्य निदेशं निर्वर्तयितुकामः तं शूलमारोपयितुं वध्यस्रजं ग्रीवायां बबन्ध । अथ

परिवृतेष्वनुचरेषु तं शूलाभ्यर्णं नीत्वा हननाय ससम्भ्रमं प्रयतमानेषु, सद्यः कुतोऽपि प्रदेशात्कश्चन पुरुषस्सरभसमागत्य सेवकान्नियुद्धसन्नद्धानपि बाहुबलेन प्रधान्य, प्रवरसेनगलस्थां सुमनोमालां सञ्चूर्ण्य, तेन सह वध्यागाराद्बहिर्निरगात् । तदा पूर्वमागतस्सारथिर्बहिरङ्गणे स्वपिति स्म । निबद्धवाहः स्यन्दनश्च नातिदूर आसीत् । तत्सर्वं स्वानुकूलं विदन् स प्रवरसेनं रथ उपवेश्य स्वयं सारथ्यमवलम्ब्य पवनवेगेन स्यन्दनं नुनोद ।

एतावति प्रवरसेनस्तं, भ्रातरं शूरसेनं विदित्वा यथोचितमनुष्ठाय तस्य तत्रागमनकारणं, अकाण्डोपनतापत्परित्राणं चोद्दिश्य मार्ग एव सविनयमप्राक्षीत् । स एवमकथयत्– "वत्स! अहं भवद्वियोगदूनमानसस्त्वद्वार्तामजानन् सत्रपतिशरणान्निर्गतस्सर्वं कलिङ्गदेशं भ्रमन् पूर्वेद्युः सायंकाले एतद्वध्यागारपश्चिमद्वारदेशमासाद्य निकटनिकुञ्जे विश्रान्तिसुखं निर्विशन् कस्यचन महात्मनो वृद्धस्य वध्यस्थानाधिपतिं प्रति "श्व आसायं यः को वा वध्यप्रदेशमुपेयात् सोऽविचार्यैव हन्तव्यः' इत्यर्थोपबृंहितमादेशमशृणवम् । स च मां नितरां व्यथयामास । वेषेण स महात्मा सचिव इति व्यज्ञायि । स्वयमेवागत्याज्ञाकरणेनास्य, कश्चिन्महापुरुषो वध्यो भवेत्, तस्मात्सोऽवश्यं द्रष्टव्यो मयेति कुतूहलं हृदयेऽवकाशमलभत । प्रतिपालयति तमेवार्थं मयि, वत्स एवापदस्त्रातव्यः समजनि । अहो! भक्तवात्सल्यं सर्वेशस्य, येनाहमत्र नियोजितः" इति ।

एवमापत्पारावारोत्तरणात्प्रमोदस्य परां काष्ठामापन्नौ तौ शान्तिवर्मक्रीडोपवनं प्रति प्रययतुः । इत उद्याने शान्तिवर्मा निर्निमेषं प्रवरसेनं निरीक्षते स्म । उत्सवमुहूर्तस्तु नेदीयान्बभूव । मङ्गलतूर्यादिका अभ्यागतान्सम्मानयन्त इव नेदुः । पुरोधसः सङ्गशः श्रुतिवाक्यैः श्रोत्राणि सम्मोदयामासुः । मरकतमयभाजनानि चार्चनीयप्रसूनैस्वयमेवोत्सवदेवतामूर्तिं अर्चयन्तीव चकाशिरे । तानि कुसुमभाजनानि परितो

निहिता निर्मलजलसम्पूरिताः शातकुम्भकुम्भाश्चात्मनस्सार्थयितुं चकाङ्क्षुः। मिलितास्सर्वे जना अहमहमिकयाननान्युन्नमय्य शूरसेनसरणिमेव अवलुलोकिरे।

एतस्मिन्नवसरे वैनतेयवेगातिशायिनाऽऽत्मानुरूपसारथिनुद्यमानस्यन्दनेन प्रवरसेनस्समाजगाम। तमवेक्ष्य राजाऽऽत्मन्येवं सन्दिदेह— "सारथिरयं शूरसेनः? आहोस्वित् अभ्यन्तरोपविष्टो दीप्ततेजाः मनुजो वा? अथ वा हर्षातिरेक एवं सन्देहयति? यद्वा सारथिरथिकयोः रूपसाम्यम्?" इति। अन्ततः अन्तिमकोटिरेव तथ्यतामाटीकत। तथापि स रथान्तर्भ्राजमानं प्रवरसेनं प्रति "शूरसेन! किमेतावान्विलम्बो भवदागमनेन परिचितः?" इत्यन्वयुङ्क्त। स एवमवदत्— "भूमिमणे! किं वदामि दैवदुर्विलासम्। तत्रभवत्सूद्यानसरणिमनुसरत्सु, मामेकाकिनमेव स्यन्दनान्तरमारोप्याऽऽरामं नयेति सारथिमादिश्यामात्यप्रवरे दूरदर्शिनि कार्यान्तरव्याप्ते, मायी सूतस्तु मां वध्यागारं प्रापयामास। ततस्तत्राधिकृतो वध्यस्रजा मम ग्रीवामलङ्कृत्य मारणायोद्युक्तो बभूव। एतस्मिन्नन्तरेऽयं महात्मा तं घातुकं धिक्कृत्य मां मोचयामास। अयं तु ममानुजः प्रवरसेनः, यो मद्राज्यभ्रंशादारभ्यास्मद्विरहासहिष्णुर्मदन्वेषणायै विविधदेशानटन् दैवेनात्र नियोजितः। अतः परमुदन्तमयमेव ब्रवीति" इति।

अथ शान्तिवर्मा तं प्रवरसेननाम्ना पिहितं सारथिं शूरसेनं गाढमालिङ्ग्य "मित्रमणे! त्वमस्मदीयेपूच्चतामारोढुमर्हसि; येन त्वया मत्प्राणसहोदरोऽयं राजकुमारो रक्षितः" इति पुनः पुनः प्रशंसन् अवशिष्टवार्तां वक्तुं प्रार्थयाञ्चक्रे। स च साञ्जलिबन्धं "नृपतिवर्याहं देशभ्रमणपरिपाट्या यदा श्रान्तो युष्मद्वध्यागारान्तिकनिकुञ्जे विश्रान्तिसुखं लभमान उपाविशम्, तदैव कश्चिन्महापुरुष इदानीमपि भवदभ्यर्णोपविष्टः समागत्य वध्यस्थानं, तदधिपतिं सशपथमेवमादिदेश— 'श्वः प्रदोषपर्यन्तं यः को वा यदि वध्यस्थलं प्रविशेत् सोऽविचार्य राजाज्ञां

शिरसि निधाय सद्यो मारयितव्यः' इति । वध्यालयपतौ च ससाध्वसमभ्युपगम्य तादृक्षे कार्ये प्रवृत्तेऽहं तत्रासन्न एवमकरवम् । अतः परं देवः प्रमाणं" इति अवादीत् । आकर्ण्येमां वार्तां महीन्द्र ईदृशकार्यकर्ता दूरदर्श्येवेति निश्चित्य तस्मा अतितरां क्रुद्धोऽपि उत्सवसमयतया निगृह्य कोपं तौ प्रवरसेनशूरसेनौ यथोचितमुपवेश्य महोत्सवं सम्भ्रमेण निर्वर्तयामास ।

एवं प्रागभिहितक्रमेण तथ्यतो यः शूरसेनः स प्रवरसेननाम्ना, यस्तु-प्रवरसेनः स शूरसेनसंज्ञया च शान्तिवर्मराजधान्यां प्रथितावास्ताम् । परं तु शूरसेन उत्तरत्र कार्यानुकूल्याय यथार्थविषयं, धर्ममूर्तिं शान्तिवर्माणमवोचत । एवं विद्यमाने, नरेन्द्रे वध्यालयोदन्तविमर्शाय दूरदर्शिनमाकारयति स कलिङ्गराजधान्यां नोपलेभे । भृत्याः "देव! सचिवाग्रणीः क्षणद्वयात्पूर्वं शकटमारुह्य कुत्र वा प्रायासीत्, प्रायशः स मगधदेशं प्रति जगामेति तदात्वोद्योगेन विज्ञायते" इति न्यवेदयन् । तदा शूरसेनो राजानमेवमब्रूत– "नरपते! स मत्कार्यानुकूलः सन्नेव वर्तते । तस्मादद्य तस्य दण्डनादिप्रयत्नः शुभोदर्काय न भवेदिति मन्ये" इति । शान्तिवर्मा तदेवानुमुमुदे ।

इतो मगधराजधान्यां दूरदर्शी कलावत्या समं समालोच्य शान्तिवर्मान्तिकं दूतं प्रेषयामास । सोऽयं समेत्य "राजन् कलिङ्गदेशावतंस! मगधराज्ञी कलावती सप्रणाममेवं विज्ञापयति– 'देव! बहोः कालाद्युष्मत्परवशा मगधराजधानी अनुरूपनृपतेरभावेन दुरवस्थामलभतेति भवद्भिर्विदितमेव । तथापि जोषम्भावो भवादृशां न वरीयान् । तत एतावत्पर्यन्तं एतद्देशपालन्या ममोपकारं संस्मृत्य, तदनुगुणं भवद्रक्षान्तर्वर्तिनं मत्कुमारं प्रवरसेनं मगधराजं विधाय कल्पान्तस्थायियशोभाजनं भवितुमर्हसीति'" इत्यब्रवीत् । तदा शान्तिवर्मा "यदि ज्यायान् शूरसेनोऽभ्युपगच्छेत्, तदाङ्गीकृतमेवास्माभिः" इत्युक्त्वा प्रवरसेनलपन-

मपश्यत् । स तु सामोदं "यन्मातुरभिलषितं तदवश्यं निर्वर्तनीयम्, तत्राहं सहकारीति जानीहि" इति जनसमक्षमाचख्यौ । तदनुरोधेन शान्तिवर्मा तस्यैव दूतस्य द्वारा कलावत्यै एवं सन्दिदेश– "महाराज्ञि! यद्भवत्या सन्दिष्टं तत् वयं, शूरसेनः, महाजनाश्चाभ्युपगन्तारः, तच्छुभे मुहूर्ते आगामिनि भार्गववासरे राज्याभिषेककार्यं निर्वर्तयेदिति निर्णीतम् । तदा वयं सपरिवारं समेष्यामः, भवत्या तु सर्वं सज्जीकर्तव्यम्" इति ।

दूतस्सानन्दं जवेन कलावतीनिलयं समागत्य तामिमां भव्यवार्तां श्रावयामास । राज्ञी दूरदर्शिना सहानन्दपरवशा सर्वं सत्वरं सज्जयामास ।

इति सप्तमः परिच्छेदः



अथाष्टमः परिच्छेदः

अथ भृगुवासरो निखिलप्रकृतीनां मनस्यानन्दमङ्कुरयन् निष्प्रत्यूहमायासीत्। पुरोधसो "ज्येष्ठमन्तरेण तदनुजन्मनो राज्याभिषेचनं धर्म्यां रीतिं न भजते" इति जानन्तोऽपि राजसेवाकवलिततया तदनुमोदमाना इवाभिषेकमहाय महानद्याद्युदकसम्पूरितकलशानि साशङ्कमसज्जयन्। भगवान् पद्मबान्धवः पद्मानि विकासयन्नलिकुलानामाहारमचीकृपत् । विविधवाद्यनिनादाः दिग्दन्तिनोऽपि प्राबोधयन् । नैकविधजनपदेभ्यः सामन्तवसुमतीपतीनां परिभूतवायुवेगानि प्रवहणानि अहमहमिकया राजधानीं प्राविक्षन्। सर्वेऽपि प्रकृतयोऽम्बुबिन्द्वभिलाषिणश्चातका इवोन्नयनराजयः शान्तिवर्मागमनं निरीक्षन्ते स्म । अस्मिन्नवसरे शान्तिवर्मा सपरिवारः

समाससाद । पुरोहिताः सद्य एव शूरसेनमभिषेकपीठमुपगमय्य, पश्यन्त्यां कलावत्यां कलशोदकेनाभ्यषिञ्चन् । मङ्गलदुन्दुभयो नितरां नेदुः ।

ततः शान्तिवर्मा तं सिंहासन उपवेश्य महाजनानां समक्षं निखिलं मगधराज्यं समर्पयामास । इतः प्रागेव शूरसेनामात्यो निशातधिषणो मगधराजधानीं समेत्योत्सवनिर्वर्तक आसीत्, यः सत्रपतिसदने कार्यव्याजेन शूरसेनेन परित्यक्तो राजविरहममर्षयन् भागधेयानुकूल्यं प्रतिपालयति स्म । एवं समाप्तेऽभिषेकोद्धवे शान्तिवर्मातिवेलमर्चितो सुहृद्वियोगमसोढाऽपि प्रजापालनाय सपरिवारः कलिङ्गदेशं प्रतस्थे । सामन्तनरपतयोऽपि बाढमातिथ्यं गृहीताः मगधवसुमतीकमितारमामन्त्र्य स्वनगरमगुः । एवं दिनत्रयं व्यतीयाय । कलावतीदूरदर्शिनौ आत्मेप्सितसिद्ध्यातितरां सम्मदसागरे प्लवेते स्म । ततो दूरदर्शी स्वं धन्यं मन्यमानः कार्यान्तरगौरवेण राज्ञीमाभाष्य कृतागा अपि यथापूर्वं कलिङ्गनगरं निर्भीकः प्रायात् ।

इतो राज्ञी कलावती तदा तदा, सिंहासनासीनं निशातधिषणेन सह मन्त्रयमाणं शूरसेनं निरीक्ष्य चेष्टादिना "नायं मत्तनयः प्रवरसेनः" इति जानन्त्यपि, पौरव्यवहारेण शान्तिवर्मणो दृढप्रत्ययेन च तं निजसुत इत्येव निश्चिनुते स्म । याथार्थ्यावगमने तस्य चिरादर्शनं अप्रत्यूहायत । नरपतिर्निशातधिषणसाह्यं वहन् राज्यधुरां पूर्वापेक्षयातिशयेन बभार । सहृदयाः! ईक्षध्वं दैवस्य क्रीडां, येन लोके "**सत्यमेव जयति**" इति विजयपताका प्रोद्धृता । इत्थमेव कानिचिदहानि व्यतीयुः ।

इह जगति सुखसोपानारोहिणो जनिमन्तस्समेऽपि सुखस्य परां काष्ठामारोढुमतितरामीहन्त इति निखिलाविदितं न । एवं शूरसेने नरपतौ राज्यं धर्म्येण पथा परिपालयति, प्रजासु धर्माविरोधेनार्थकामसेवनतत्परासु, कदाचित् क्षितिपतिर्मृगयाविनोदाय सपरिवारोऽरण्यमगाहत । तत्र विविध-

शरारुमृगान् व्यापाद्यानुचरैस्सेव्यमानः कुत्रचित्स्निग्धतृणपूलकानुरञ्जित-भूतल आखेटायासापनोदनायोपाविशत् । तदानीमेव भास्करः प्रभु-भियेव स्वकरान् सङ्कोचयित्वास्ताचलकुञ्जेष्वन्तर्दधे । समीरकिशोरस्त्वद्यैव स्वामिसेवासमय इति मन्दमन्दमाववौ । राकाविभावरीनाथोऽपि पूर्वाशावदनचुम्बनक्रियाया विरामं वितरन्निव दिवमुपर्युपर्यारुरोह । सद्यो विकसन्मल्लिकाकुड्मलविहारिणोऽलयो झेङ्कारैर्दिङ्मुखानि मुखर-यन्ति स्म ।

अस्मिन्नेव समये कोऽपि तरुणहरिणोऽरण्यस्य कुतश्चिद्दिङ्मुखा-त्प्रणयकुपितां कान्तामनुनयन् निर्ययौ । कथञ्चित् समाधापितमानसा च कुरङ्गरमणी दयितप्रणयपराधीना समभवत् । विरहिनिवहमात्रस्य कमपि रागं वर्धयन्ती मृगमिथुनस्य तदानीन्तनी तादृशी दशा सद्यस्सौदामनी-जानेर्हृदयमनङ्गशैलूषस्य रङ्गस्थानमकल्पयत् । ततः सपदि स भ्रान्त इव, उन्मत्त इव, पिशाचग्रस्त इव, मदिरामत्त इव तरुलतादीनि विलोक्य सौदामनीत्याह्वयितुमुपाक्रमत । पश्यत सहृदयाः! वियोगिनां मनोवृत्तिः कीदृशीं दशां निर्विशतीति । तदा सर्वे सेवकाः तं सविनयं नगरं नीत्वा विजनस्थले कैश्चित्परिवारैः शुश्रूष्यमाणं पर्यपालयन्। प्रजानां नरपतिर्नितरामस्वस्थ इत्येव न्यवेदयन् । केचिद्गूढचारास्तु सौदामन्या गवेषणायै नानाजनपदान् प्रातिष्ठन्त । कलावतीप्रभृतयोऽवरोधा नृपत्य-स्वस्थतां विचिन्तयन्त्योऽशनमपि विषोपमं मेनिरे । इत्थं कानिचित् दिनानि वर्षप्रायाणि व्यतीयुः ।

कदाचित्पूर्णेन्दुशोभितायां निःशब्दताभूषितायां निशायां शूरसेनो निमेषमेकमपि यापयितुमपारयन्नुत्थाय परिमितपरिजनैस्समं समीप-बालोद्यानमेत्य निशाकान्तकान्तशिलाफलक उपविवेश । तत्र त्वेकत्र मन्दमारुतेन, अपरत्र सूचिकाग्रायमाणनिशाकरकराग्रेण, अन्यतः सौगन्ध्यं प्रकिरद्भिः पुष्पप्रकरैश्च भृशं बाध्यमानोऽपि कथञ्चित्क्षपा-

मतिवाहयितुमीहमानः कदाचित्तस्मिन्फलकेऽशेत । पुनरुपवेशनमेव वरमित्युत्थायोपाविक्षत् । जातुचिदतिष्ठत् । कदाचित्सौदामनीति प्रलपन् तद्भ्रान्त्या वृक्षवल्यादीनालिलिङ्ग । अथ निराशस्सन् लज्जयाऽऽत्मानमेव निनिन्द । पुनः पुनरेवमेव विदधदतिमात्रं श्रान्तस्तस्मिन्नेव शिलाफलके तूष्णीमशेत । किञ्चिन्निद्रयाऽऽश्लिष्ट इव नयने निमील्य तामेव दध्यौ ।

तादृशीमस्यावस्थां चिरेण लक्षयन्ती काचिदङ्गनान्तिकमागत्य व्रीडामूढाऽसंलपन्त्येव तूष्णीमतिष्ठत । एतस्मिन्नवसरे शूरसेनः स्वप्ने सौदामनीं पुरोभागे स्थितामिव विलोकयन्नुद्बुध्य चरणतलोपस्थितां तामेवाश्लिष्यत् । स्पर्शसुखेन किमपि रमणीरत्नमिति मन्वानोऽपि पूर्वानुभवानुरोधेन भ्रान्तमेवात्मानं मेने । पुनश्च किञ्चिद्विमृश्य वदनेन्द्वधरीकृतसुधांशुं तां काचिदपरिचिततरुणीति निरचिनोत् ।

अथ स्वं परकान्तास्पर्शदोषहेतोर्मुहुर्मुहुरुपालभमानो लज्जाभरभुग्नलपनो मदनं, इन्दुं चेत्थं निन्दितुमारभत । "आः, मदनहतक! विरहिणोऽपथे प्रवर्तयित्रा त्वया किं वा न कृतम्? बत! भगवन्तं पितामहमपि निजात्मजानुरक्तमकृथाः! । कुतो वा त्वामनङ्गं कुर्वता पशुपतिना त्वदात्मा न निश्शेषीकृतः? सोऽपि वेदान्ताभ्यासजड आत्मानं नित्यं मन्यमानः समूलं त्वन्नाशे न प्रववृत इति जाने । अयं च दुरात्मा चन्द्रस्तव साहाय्यकर्ता । कथं त्वत्सुहृदं कलङ्किनमिमं ग्रसन् भगवान् राहुरपि जहाति । असावपि वियोगिवधपातकिनोऽस्य स्पर्शेनात्मनः पातकितां तर्कयति" । इत्यादीन्युपालम्भवचनान्युद्विरति शूरसेने सा ललनामणिः कोकिलरुतेनैवं वदितुमुपचक्रमे । "पुरुषपुङ्गव! अलमात्मानमन्यथा सम्भाव्य । जानीहि मां त्वदनुचरीं; या बहोः कालात्त्वद्विरहतप्ता विविधजनपदमटन्ती स्वप्नेऽपि भवन्तमेवानुचिन्तयन्ती सत्रपत्युदवसितान्तिक उपस्थितापि कार्यान्तरमिषेण परित्यक्ता । या चार्धाङ्गी दयितस्य नव्यराज्यरमापरिग्रहेण चिरविरहितापि प्रमोदपारावारतरङ्ग-

परम्परासु प्लवमाना रन्ध्रान्वेषिणी बालोद्याने भावकसन्दर्शनं प्रतिपालयति स्म" इति । तदा शूरसेनः सविग्रहं स्वमनोरथसर्वस्वमिव तां निर्निमेषमीक्षमाणः सम्मोदाश्रूणि वर्षन् मुहुर्मुहुः चिरविरहनिदानमात्मानं निन्दन् तया हरिणाक्ष्या सह सपरिजनो हर्म्यान्तरमयासीत् ।

ततो निशायां निजकान्तेन साकं कस्मिंश्चिदुद्देशे निलीनायां, भगवति भानुमत्यप्युदयाचलमयमाने, वियोगाग्निसन्तप्तभूपतेर्दयिता-समागमोदन्तः सर्वेषु पौरेषु व्याश्रुत । तदा विदितवृत्तान्ता कलावती अशनिताडितेव नितान्तमाकुला वार्तामिमां निर्णेतुकामा नरपतिनिकेतनमियाय । तदा सौदामनी परं भक्तिनम्रा तस्यै नमश्चकार । शूरसेनोऽपि यथोचितमनुतस्थौ । तस्मादत्यर्थममर्षाविष्टा किमपि वक्तुमपारयन्ती सा जोषम्भावमुपगता ततो निर्गत्य स्वालयमुपागात् । तत्र तु व्रतिनीव निरशना, भुजङ्गीव मर्मभेदनप्रवृत्ता, कुलटेव नैकविधभावसम्भिन्ना मौनेनोपविवेश । प्रवरसेनो नन्दनीये विषये दुःखिनीं जननीं कर्णा-कर्णिकयाऽऽकर्ण्यानुनयनाय तदभ्यर्णं द्रुततरमेत्य "मातः! कोऽयं व्यामोहस्तव, यत्प्रमोदस्थान उद्विग्नासि? त्यज तादृशीमास्थाम् । मे प्रियाग्रजन्मा मत्प्रार्थनानुरोधेनैव वसुन्धराधुरीणस्संवृत्त इति संविद्धि । भागधेयानुसारी विधिरपि नीतिसरणिविरुद्धं भवत्या भावं नानुमनुते, येन स्फुटमप्यावयोर्भेदं जनन्यपि त्वमभिषेकोत्सवसम्भ्रमे नाज्ञासीः । सर्वथापि देवता भूतार्थमेवानुरुन्धन्ति । नूनं त्वं मगधधराभृद्वंशकलङ्कवर्षिणी, यस्याः कृते सत्यपथे वर्तमानोऽप्युदात्तो भ्राता पूर्वं वसुन्धरासाम्राज्यमत्याक्षीत् । वयं च कान्तारवासिनस्संवृत्ताः । अद्यापि तवाग्रहो नानंक्षीत् । तन्मन्ये त्वज्जीवितेन साकं दृढं सौहार्दमापन्नः स त्वया सहैव शाम्येदिति" इत्थं कटूक्त्या निरभर्त्सयत् ।

तदा सा भृशं लज्जिता त्यक्ताग्रहा प्रकृतिमापन्ना, "वत्स! मामेवं मावमंस्थाः । इतः परं कदापि भवदभिलाषस्येयं वामा न भवतीत्यवेहि ।

जात! शूरसेनः सुखेन राज्यं शास्तु" । इत्याद्यभिमतभणित्या शूरसेनस्य नृपतितां निष्कपटमन्वमंस्त। स्वयमपि सामोदं शूरसेनमेत्य समाधासीत् ।

एवं शूरसेनो निष्कण्टकं राज्यं युवराजपदवीधरेणानुजन्मना सह पालयन्, प्रजारञ्जनमेव स्वनित्यं कर्म मन्वानः, सौदामन्या दयितया स्वर्गीयान्क्रत्वादीनाचरन्, पुत्रपौत्रादिभिः परिवृतः सामन्तभूमिपति-मुकुटमणिनीराजितचरणयुगलोऽर्थिव्यूहमनोरथपूरणकल्पतरुस्सन् चिरं मगधराजधानीं प्रसाधयति स्म ।

इन्द्रो ददातु समये जगते सुवृष्टिं
सस्यैश्चकास्तु वसुधा फलवृन्दशस्यैः ।
राज्यं प्रशास्तु नृपतिर्निजधर्मसक्तः
सर्वे जयन्तु सुखिनः परमेशभक्ताः ॥ ६ ॥

सेयं नृसिंहस्य कृतिर्बुधानामाभानुचन्द्रं मुदमातनोतु ।
सौदामनीचारुगुणैर्महत्यः पतिव्रताश्चाप्रतिमा रमण्यः ॥ ७ ॥

इति श्रीकोटीश्वराभिजनेन श्रीमद्रपुरीविश्वविद्यालयसाहितीशिरोमणिना
श्रीमन्महीशूरपुरीसाहितीविदुषा **नरसिंहाचार्यशर्मणा**
विरचितायां
सौदामन्यभिधायां नवीनकृत्यां
अष्टमः परिच्छेदः

समाप्तोऽयं ग्रन्थः

॥ श्रीः ॥

॥ श्रीहयग्रीवाय नमः ॥

किरातार्जुनीयसङ्ग्रहः

श्रियः कुरूणामधिपस्य पालनीं प्रजासु वृत्तिं यमयुङ्क्त वेदितुम् ।
स वर्णिलिङ्गी विदितः समाययौ युधिष्ठिरं द्वैतवने वनेचरः ॥ १ ॥

कृतप्रणामस्य महीं महीभुजे जितां सपत्नेन निवेदयिष्यतः ।
न विव्यथे तस्य मनो न हि प्रियं प्रवक्तुमिच्छन्ति मृषा हितैषिणः ॥ २ ॥

द्विषां विघाताय विधातुमिच्छतो रहस्यनुज्ञामधिगम्य भूभृतः ।
स सौष्ठवौदार्यविशेषशालिनीं विनिश्चितार्थामिति वाचमाददे ॥ ३ ॥

क्रियासु युक्तैर्नृप चारचक्षुषो न वञ्चनीया प्रभवोऽनुजीविभिः ।
अतोऽर्हसि क्षन्तुमसाधु साधु वा हितं मनोहारि च दुर्लभं वचः ॥ ४ ॥

स किंसखा साधु न शास्ति योऽधिपं हितान्न यः संशृणुते स किंप्रभुः ।
सदानुकूलेषु हि कुर्वते रतिं नृपेष्वमात्येषु च सर्वसम्पदः ॥ ५ ॥

निसर्गदुर्बोधमबोधविक्लवाः क्व भूपतीनां चरितं क्व जन्तवः ।
तवानुभावोऽयमवेदि यन्मया निगूढतत्त्वं नयवर्त्म विद्विषाम् ॥ ६ ॥

विशङ्कमानो भवतः पराभवं नृपासनस्थोऽपि वनाधिवासिनः ।
दुरोदरच्छद्मजितां समीहते नयेन जेतुं जगतीं सुयोधनः ॥ ७ ॥

तथापि जिह्मः स भवज्जिगीषया तनोति शुभ्रं गुणसम्पदा यशः ।
समुन्नयन्भूतिमनार्यसङ्गमाद्वरं विरोधोऽपि समं महात्मभिः ॥ ८ ॥

अनारतं तेन पदेषु लम्भिता विसृज्य सम्यग्विनियोगसत्क्रियाः ।
फलन्त्युपायाः परिबृंहितायतीरुपेत्य सङ्घर्षमिवार्थसम्पदः ॥ ९ ॥

उदारकीर्तेरुदयं दयावतः प्रशान्तबाधं दिशतोऽभिरक्षया ।
स्वयं प्रदुग्धेऽस्य गुणैरुपस्तुता वसूपमानस्य वसूनि मेदिनी ॥ १० ॥

प्रलीनभूपालमपि स्थिरायति प्रशासदावारिधि मण्डलं भुवः ।
स चिन्तयत्येव भियस्त्वदेष्यतीरहो दुरन्ता बलवद्विरोधिता ॥ ११ ॥

तदाशु कर्तुं त्वयि जिह्ममुद्यते विधीयतां तत्र विधेयमुत्तरम् ।
परप्रणीतानि वचांसि चिन्वतां प्रवृत्तिसाराः खलु मादृशां गिरः ॥ १२ ॥

इतीरयित्वा गिरमात्तसत्क्रिये गतेऽथ पत्यौ वनसन्निवासिनाम् ।
प्रविश्य कृष्णासदनं महीभुजा तदाचचक्षेऽनुजसन्निधौ वचः ॥ १३ ॥

निशम्य सिद्धिं द्विषतामपाकृतीस्ततस्ततस्त्या विनियन्तुमक्षमा ।
नृपस्य मन्युर्व्यवसायदीपिनीरुदाजहार द्रुपदात्मजा गिरः ॥ १४ ॥

भवादृशेषु प्रमदाजनोदितं भवत्यधिक्षेप इवानुशासनम् ।
तथापि वक्तुं व्यवसाययन्ति मां निरस्तनारीसमया दुराधयः ॥ १५ ॥

भवन्तमेतर्हि मनस्विगर्हिते विवर्तमानं नरदेव वर्त्मनि ।
कथं न मन्युर्ज्वलयत्युदीरितः शमीतरुं शुष्कमिवाग्निरुच्छिखः ॥ १६ ॥

परिभ्रमन्लोहितचन्दनोचितः पदातिरन्तर्गिरि रेणुरूषितः ।
महारथः सत्यधनस्य मानसं दुनोति नो कच्चिदयं वृकोदरः ॥ १७ ॥

विजित्य यः प्राज्यमयच्छदुत्तरान् कुरूनकुप्यं वसु वासवोपमः ।
स वल्कवासांसि तवाधुना हरन् करोति मन्युं न कथं धनञ्जयः ॥ १८ ॥

वनान्तशय्याकठिनीकृताकृती कचाचितौ विश्वगिवागजौ गजौ ।
कथं त्वमेतौ धृतिसंयमौ यमौ विलोकयन्नुत्सहसे न बाधितुम् ॥ १९ ॥

इमामहं वेद न तावकीं धियं विचित्ररूपाः खलु चित्तवृत्तयः ।
विचिन्तयन्त्या भवदापदं परां रुजन्ति चेतः प्रसभं ममाधयः ॥ २० ॥

पुराधिरूढः शयनं महाधनं विबोध्यसे यः स्तुतिगीतिमङ्गलैः ।
अदभ्रदर्भामधिशय्य स स्थलीं जहासि निद्रामशिवैः शिवारुतैः ॥ २१ ॥

पुरोपनीतं नृप रामणीयकं द्विजातिशेषेण यदेतदन्धसा ।
तदद्य ते वन्यफलाशिनः परं परैति कार्श्यं यशसा समं वपुः ॥ २२ ॥

अनारतं यौ मणिपीठशायिनावरञ्जयद्राजशिरःस्रजां रजः ।
निषीदतस्तौ चरणौ वनेषु ते मृगद्विजालूनशिखेषु बर्हिषाम् ॥ २३ ॥

द्विषन्निमित्ता यदियं दशा ततः समूलमुन्मूलयतीव मे मनः ।
परैरपर्यासितवीर्यसम्पदां पराभवोऽप्युत्सव एव मानिनाम् ॥ २४ ॥

विहाय शान्तिं नृप धाम तत्पुनः प्रसीद सन्धेहि वधाय विद्विषाम् ।
व्रजन्ति शत्रूनवधूय निःस्पृहाः शमेन सिद्धिं मुनयो न भूभृतः ॥ २५ ॥

न समयपरिरक्षणं क्षमं ते निकृतिपरेषु परेषु भूरिधाम्नः ।
अरिषु हि विजयार्थिनः क्षितीशा विदधति सोपधि सन्धिदूषणानि ॥ २६ ॥

विहितां प्रियया मनःप्रियामथ निश्चित्य गिरं गरीयसीम् ।
उपपत्तिमदूर्जिताश्रयं नृपमूचे वचनं वृकोदरः ॥ २७ ॥

यदवोचत वीक्ष्य मानिनी परितः स्नेहमयेन चक्षुषा ।
अपि वागधिपस्य दुर्वचं वचनं तद्विदधीत विस्मयम् ॥ २८ ॥

इयमिष्टगुणाय रोचतां रुचिरार्था भवतेऽपि भारती ।
ननु वक्तृविशेषनिःस्पृहा गुणगृह्या वचने विपश्चितः ॥ २९ ॥

चतसृष्वपि ते विवेकिनी नृप विद्यासु निरूढिमागता ।
कथमेत्य मतिर्विपर्ययं करिणी पङ्कमिवावसीदति ॥ ३० ॥

द्विषतामुदयः सुमेधसा गुरुरस्वन्ततरः सुमर्षणः ।
न महानपि भूतिमिच्छता फलसम्पत्प्रवणः परिक्षयः ॥ ३१ ॥

अभिमानवतो मनस्विनः प्रियमुच्चैः पदमारुरुक्षतः ।
विनिपातनिवर्तनक्षमं मतमालम्बनमात्मपौरुषम् ॥ ३२ ॥

विपदोऽभिभवन्त्यविक्रमं रहयत्यापदुपेतमायतिः ।
नियता लघुता निरायतेरगरीयान्न पदं नृपश्रियः ॥ ३३ ॥

तदलं प्रतिपक्षमुन्नतेरवलम्ब्य व्यवसायवन्ध्यताम् ।
निवसन्ति पराक्रमाश्रया न विषादेन समं समृद्धयः ॥ ३४ ॥

कुरु तन्मतिमेव विक्रमे नृप निर्धूय तमः प्रमादजम् ।
ध्रुवमेतदवेहि विद्विषां त्वदनुत्साहहता विपत्तयः ॥ ३५ ॥

ज्वलतस्तव जातवेदसः सततं वैरिकृतस्य चेतसि ।
विदधातु शमं शिवेतरा रिपुनारीनयनाम्बुसन्ततिः ॥ ३६ ॥

इति दर्शितविक्रियं सुतं मरुतः कोपपरीतमानसम् ।
उपसान्त्वयितुं महीपतिर्द्विरदं दुष्टमिवोपचक्रमे ॥ ३७ ॥

अपवर्जितविप्लवे शुचौ हृदयग्राहिणि मङ्गलास्पदे ।
विमला तव विस्तरे गिरां मतिरादर्श इवाभिदृश्यते ॥ ३८ ॥

अवितृप्ततया तथापि मे हृदयं निर्णयमेव धावति ।
अवसाययितुं क्षमाः सुखं न विधेयेषु विशेषसम्पदः ॥ ३९ ॥

सहसा विदधीत न क्रियामविवेकः परमापदां पदम् ।
वृणते हि विमृश्यकारिणं गुणलुब्धाः स्वयमेव सम्पदः ॥ ४० ॥

शुचि भूषयति श्रुतं वपुः प्रशमस्तस्य भवत्यलङ्क्रिया ।
प्रशमाभरणं पराक्रमः स नयापादितसिद्धिभूषणः ॥ ४१ ॥

स्पृहणीयगुणैर्महात्मभिश्चरिते वर्त्मनि यच्छतां मनः ।
विधिहेतुरहेतुरागसां विनिपातोऽपि समः समुन्नतेः ॥ ४२ ॥

ಪಟ್ಟಿಯಲ್ಲಿ ಸಂಖ್ಯೆ... P2453

अपनेयमुदेतुमिच्छता तिमिरं रोषमयं धिया पुरः ।
अविभिद्य निशाकृतं तमः प्रभया नांशुमताप्युदीयते ॥ ४३ ॥

बलवानपि कोपजन्मनस्तमसो नाभिभवं रुणद्धि यः ।
क्षयपक्ष इवैन्दवीः कलाः सकला हन्ति स शक्तिसम्पदः ॥ ४४ ॥

उपकारकमायतेर्भृशं प्रसवः कर्मफलस्य भूरिणः ।
अनपायि निबर्हणं द्विषां न तितिक्षासममस्ति साधनम् ॥ ४५ ॥

अनुशासतमित्यनाकुलं नयवर्त्माकुलमर्जुनाग्रजम् ।
स्वयमर्थ इवाभिवाञ्छितस्तमभीयाय पराशरात्मजः ॥ ४६ ॥

सहसोपगतः सविस्मयं तपसां सूतिरसूतिरापदाम् ।
ददृशे जगतीभुजा मुनिः स वपुष्मानिव पुण्यसञ्चयः ॥ ४७ ॥

अवहितहृदयो विधाय सोऽर्हामृषिवदृषिप्रवरे गुरूपदिष्टाम् ।
तदनुमतमलञ्चकार पश्चात्प्रशम इव श्रुतमासनं नरेन्द्रः ॥ ४८ ॥

नृपस्ततो धर्मनिबन्धिनीनां प्रसूतिमेनःप्रणुदां श्रुतीनाम् ।
हेतुं तदभ्यागमने परीप्सुः सुखोपविष्टं मुनिमाबभाषे ॥ ४९ ॥

अद्य क्रियाः कामदुघाः क्रतूनां सत्याशिषः सम्प्रति भूमिदेवाः ।
आ संसृतेरस्मि जगत्सु जातस्त्वय्यागते यद्बहुमानपात्रम् ॥ ५० ॥

श्रियं विकर्षत्यपहन्त्यघानि श्रेयः परिस्रौति तनोति कीर्तिम् ।
सन्दर्शनं लोकगुरोरमोघं तवात्मयोनेरिव किं न धत्ते ॥ ५१ ॥

निरास्पदं प्रश्नकुतूहलित्वमस्मास्वधीनं किमु निःपृहाणाम् ।
तथापि कल्याणकरीं गिरं ते मां श्रोतुमिच्छा मुखरीकरोति ॥ ५२ ॥

इत्युक्तवानुक्तिविशेषरम्यं मनः समाधाय जयोपपत्तौ ।
उदारचेता गिरमित्युदारां द्वैपायनेनाभिदधे नरेन्द्रः ॥ ५३ ॥

चिचीषतां जन्मवतामलघ्वीं यशोवतंसामुभयत्र भूतिम् ।
अभ्यर्हिता बन्धुषु तुल्यरूपा वृत्तिर्विशेषेण तपोधनानाम् ॥ ५४ ॥

पथश्च्युतायां समितौ रिपूणां धर्म्यां दधानेन धुरं चिराय ।
त्वया विपत्स्वप्यविपत्तिरम्यमाविष्कृतं प्रेम परं गुणेषु ॥ ५५ ॥

लभ्या धरित्री तव विक्रमेण ज्यायांश्च वीर्यास्त्रबलैर्विपक्षः ।
अतः प्रकर्षाय विधिर्विधेयः प्रकर्षतन्त्रा हि रणे जयश्रीः ॥ ५६ ॥

यया समासादितसाधनेन सुदुश्चरामाचरता तपस्याम् ।
एते दुरापं समवाप्य वीर्यमुन्मूलितारः कपिकेतनेन ॥ ५७ ॥

महत्वयोगाय महामहिम्नामाराधनीं तां नृप देवतानाम् ।
दातुं प्रदानोचितभूरिधाम्नीमुपागतः सिद्धिमिवास्मि विद्याम् ॥ ५८ ॥

इत्युक्तवन्तं व्रज साधयेति प्रमाणयन् वाक्यमजातशत्रोः ।
प्रसेदिवांसं तमुपाससाद वसन्निवान्ते विनयेन जिष्णुः ॥ ५९ ॥

निर्याय विद्याथ दिनादिरम्याद्बिम्बादिवार्कस्य मुखान्महर्षेः ।
पार्थाननं वह्निकणावदाता दीप्तिः स्फुरत्पद्ममिवाभिपेदे ॥ ६० ॥

योगं च तं योग्यतमाय तस्मै तपःप्रभावाद्धिततार सद्यः ।
येनास्य तत्त्वेषु कृतेऽवभासे समुन्मिमीलेव चिराय चक्षुः ॥ ६१ ॥

आकारमाशंसितभूरिलाभं दधानमन्तःकरणानुरूपम् ।
नियोजयिष्यन्विजयोदये तं तपःसमाधौ मुनिरित्युवाच ॥ ६२ ॥

अनेन योगेन विवृद्धतेजा निजां परस्मै पदवीमयच्छन् ।
समाचराचारमुपात्तशस्त्रो जपोपवासाभिषवैर्मुनीनाम् ॥ ६३ ॥

करिष्यसे यत्र सुदुश्चराणि प्रसत्तये गोत्रभिदस्तपांसि ।
शिलोच्चयं चारुशिलोच्चयं तमेष क्षणान्नेष्यति गुह्यकस्त्वाम् ॥ ६४ ॥

इति ब्रुवाणेन महेन्द्रसूनुं महर्षिणा तेन तिरोबभूवे ।
तं राजराजानुचरोऽस्य साक्षात्प्रदेशमादेशमिवाधितष्ठौ ॥ ६५ ॥

कृतानतिर्व्याहृतसान्त्ववादे जातस्पृहः पुण्यजनः स जिष्णौ ।
इयाय सख्याविव सप्रसादं विश्वासयत्याशु सतां हि योगः ॥ ६६ ॥

अथोष्णभासेन सुमेरुकुञ्जान्विहीयमानानुदयायतेन ।
बृहद्युतीन्दुःखकृतात्मलाभं तमः शनैः पाण्डुसुतान्प्रपेदे ॥ ६७ ॥

धैर्येण विश्वास्यतया महर्षेस्तीव्रादरातिप्रभवाच्च मन्योः ।
वीर्यं च विद्वत्सु सुते मघोनः स तेषु न स्थानमवाप शोकः ॥ ६८ ॥

तान्भूरिधाम्नश्चतुरोऽपि दूरं विहाय यामानिव वासरस्य ।
एकौघभूतं तदशर्म कृष्णां विभावरीं ध्वान्तमिव प्रपेदे ॥ ६९ ॥

धैर्यावसादेन हृतप्रसादा वन्यद्विपेनेव निदाघसिन्धुः ।
निरुद्धबाष्पोदकसन्नकण्ठमुवाच कृच्छ्रादिति राजपुत्री ॥ ७० ॥

मग्नां द्विषच्छद्मनि पङ्कभूते सम्भावनां भूतिमिवोद्धरिष्यन् ।
आधिद्विषामा तपसां प्रसिद्धेरस्मद्विना मा भृशमुन्मनीभूः ॥ ७१ ॥

यशोऽधिगन्तुं सुखलिप्सया वा मनुष्यसङ्ख्यामतिवर्तितुं वा ।
निरुत्सुकानामभियोगभाजां समुत्सुकेवाङ्कमुपैति सिद्धिः ॥ ७२ ॥

प्राप्तोऽभिमानव्यसनादसह्यं दन्तीव दन्तव्यसनाद्विकारम् ।
द्विषत्प्रतापान्तरितोरुतेजा शरद्घनाकीर्ण इवादिरह्नः ॥ ७३ ॥

दुःशासनामर्षरजोविकीर्णैरेभिर्विनाथैरिव भाग्यनाथैः ।
केशैः कदर्थीकृतवीर्यसारः कच्चित्स एवासि धनञ्जयस्त्वम् ॥ ७४ ॥

आक्षिप्यमाणं रिपुभिः प्रसादान्नागैरिवालूनसटं मृगेन्द्रम् ।
त्वां धूरियं योग्यतयाधिरूढा दीप्त्या दिनश्रीरिव तिग्मरश्मिम् ॥ ७५ ॥

करोति योऽशेषजनातिरक्तां सम्भावनामर्थवतीं क्रियाभिः ।
संसत्सु जाते पुरुषाधिकारे न पूरणी तं समुपैति सङ्ख्या ॥ ७६ ॥

प्रियेषु यैः पार्थ विनोपपत्तेर्विचिन्त्यमानैः क्रममेति चेतः ।
तव प्रयातस्य जयाय तेषां क्रियादघानां मघवा विघातम् ॥ ७७ ॥

मागाश्चिरायैकचरः प्रमादं वसन्नसम्बाधशिवेऽपि देशे ।
मात्सर्यरागोपहतात्मनां हि स्खलन्ति साधुष्वपि मानसानि ॥ ७८ ॥

तदाशु कुर्वन् वचनं महर्षेर्मनोरथान्नः सफलीकुरुष्व ।
प्रत्यागतं त्वास्मि कृतार्थमेव भुजोपपीडं परिरब्धुकामा ॥ ७९ ॥

उदीरितां तामिति याज्ञसेन्या नवीकृतोद्वाहितविप्रकाराम् ।
आसाद्य वाचं स भृशं दिदीपे काष्ठामुदीचीमिव तिग्मरश्मिः ॥ ८० ॥

आथाभिपश्यन्निव विद्विषः पुरः पुरोधसाऽऽरोपितहेतिसंहतिः ।
बभार रम्योऽपि वपुः स भीषणं गतः क्रियां मन्त्र इवाभिचारिकीम् ॥

अथ यक्षपभृत्यदर्शितं शिवमुर्वीधरवर्त्म सम्प्रयान् ।
हृदयानि समाविवेश स क्षणमुद्वाष्पदृशां तपोभृताम् ॥ ८२ ॥

ततः स कूजत्कलहंसमेखलां सपाकसस्याहितपाण्डुतागुणाम् ।
उपाससादोपजनं जनप्रियः प्रियामिवासादितयौवनां भुवम् ॥ ८३ ॥

विनम्रशालिप्रसवौघशालिनीरपेतपङ्काः ससरोरुहाम्भसः ।
ननन्द पश्यन्नुपसीम स स्थलीरुपायनीभूतशरद्गुणश्रियः ॥ ८४ ॥

ततस्स सम्प्रेक्ष्य शरद्गुणश्रियं शरद्गुणालोकनलोलचक्षुषम् ।
उवाच यक्षस्तमचोदितोऽपि गां न ह्यङ्गितज्ञोऽसरेऽवसीदति ॥ ८५ ॥

इयं शिवाया नियतेरिवायतिः कृतार्थयन्ती जगतः फलैः क्रियाः ।
जयश्रियं पार्थ पृथूकरोतु ते शरत्प्रसन्नाम्बुरनम्बुवारिदा ॥ ८६ ॥

उपैति सस्यं परिणामरम्यता नदीरनौद्धत्यमपङ्कता महीम् ।
नवैर्गुणैस्सम्प्रति संस्तवस्थिरं तिरोहितं प्रेम घनागमश्रियः ॥ ८७ ॥

मुखैरसौ विद्रुमभङ्गलोहितैः शिखाः पिशङ्गीः कलमस्य बिभ्रती ।
शुकावलिर्व्यक्तशिरीषकोमला धनुःश्रियं गोत्रभिदोऽनुगच्छति ॥ ८८ ॥

इति कथयति तत्र नातिदूरादथ ददृशे पिहितोष्णरश्मिबिम्बः ।
विगलितजलभारशुक्लभासां निचय इवाम्बुमुचां नगाधिराजः ॥ ८९ ॥

अथ जयाय नु मेरुमहीभृतो रभसया नु दिगन्तदिदृक्षया ।
अभिययौ स हिमाचलमुच्छ्रितं समुदितं न विलङ्घयितुं नभः ॥ ९० ॥

ग्रहविमानगणानभितो दिवं ज्वलयतौषधिजेन कृशानुना ।
मुहुरनुस्मरयन्तमनुक्षपं त्रिपुरदाहमुमापतिसेविनः ॥ ९१ ॥

विततशीकरराशिभिरुच्छ्रितैरुपलरोधविवर्तिभिरम्बुभिः ।
दधतमुन्नतसानुसमुद्धतां धृतसितव्यजनामिव जाह्नवीम् ॥ ९२ ॥

अनुचरेण धनाधिपतेरथो नगविलोकनविस्मितमानसः ।
स जगदे वचनं प्रियमादरान्मुखरतावसरे हि विराजते ॥ ९३ ॥

अलमेष विलोकितः प्रजानां सहसा संहतिमंहसां विहन्तुम् ।
घनवर्त्म सहस्रधेव कुर्वन्हिमगौरैरचलाधिपः शिरोभिः ॥ ९४ ॥

गुणसम्पदा समधिगम्य परं महिमानमत्र महिते जगताम् ।
नयशालिनि श्रिय इवाधिपतौ विरमन्ति न ज्वलितुमोषधयः ॥ ९५ ॥

दधत इव विलासशालि नृत्यं मृदु पतता पवनेन कम्पितानि ।
इह ललितविलासिनीजनभ्रूगतिकुटिलेषु पयःसु पङ्कजानि ॥ ९६ ॥

अस्मिन्नगृह्यत पिनाकभृता सलीलमाबद्धवेपथुरधीरविलोचनायाः ।
विन्यस्तमङ्गलमहौषधिरीश्वरायाः स्रस्तोरगप्रतिसरेण करेण पाणिः ॥

व्यधत्त यस्मिन्पुरमुच्चगोपुरं पुरां विजेतुर्धृतये धनाधिपः ।
स एष कैलास उपान्तसर्पिणः करोत्यकालास्तमयं विवस्वतः ॥ ९८ ॥

इह सनियमयोः सुरापगायामुषसि सयावकसव्यपादरेखा ।
कथयति शिवयोः शरीरयोगं विषमपदा पदवी विवर्तनेषु ॥ ९९ ॥

भव्यो भवन्निव मुनेरिह शासनेन क्षात्रे स्थितः पथि तपस्यहतप्रमादः ।
प्रायेण सत्यपि हितार्थकरे विधौ हि श्रेयांसि लब्धुमसुखानि विनान्तरायैः ॥

मा भूवन्नपथहृतस्तवेन्द्रियाश्वाः
सन्तापे दिशतु शिवः शिवां प्रसत्तिम् ।
रक्षन्तस्तपसि बलं च लोकपालाः
कल्याणीमधिकफलां क्रियां क्रियासुः ॥ १०१ ॥

इत्युक्त्वा सपदि हितं प्रियं प्रियार्हे
धाम स्वं गतवति राजराजभृत्ये ।
सोत्कण्ठं किमपि पृथासुतः प्रदध्यौ
सन्धत्ते भृशमरतिं हि सद्वियोगः ॥ १०२ ॥

तमनतिशयनीयं सर्वतः सारयोगा-
दविरहितमनेकेनाङ्कभाजा फलेन ।
अकृशमकृशलक्ष्मीश्चेतसा शंसितं स
स्वमिव पुरुषकारं शैलमभ्याससाद ॥ १०३ ॥

इति किरातार्जुनीयसङ्ग्रहे
प्रथमो गुच्छः
॥ श्रीः ॥

शब्दार्थकोशः

अकाण्ड - ಅಸಮಯ

अकिञ्चनता - ಬಡತನ

अक्षदर्शक - ನ್ಯಾಯಾಧಿಪತಿ

अङ्गुलीयक - ಉಂಗುರ

अञ्जसा - ಶೀಘ್ರವಾಗಿ

अतिवेलं - ಬಹಳವಾಗಿ

अतिसन्धत्ते - ಮೋಸಮಾಡುತ್ತಾನೆ

अत्यर्थं - ಬಹಳವಾಗಿ

अधिकरणस्थान-ನ್ಯಾಯಸ್ಥಾನ

अधिरोहिणी - ಏಣಿ

अध्वनीन - ದಾರಿಗ

अनीकिनी - ಸೇನೆ

अनुपदं - ತರುವಾಯ

अन्तराय - ವಿಘ್ನ

अन्येद्युः - ಮತ್ತೊಂದು ದಿನ

अन्वयुङ्क्त - ಪ್ರಶ್ನೆಮಾಡಿದನು

अपरोक्ष - ಪ್ರತ್ಯಕ್ಷ

अपश्रिम - ವಿರುದ್ಧವಲ್ಲದ

अपदेश - ನೆಪ

अप्रत्यूहायत - ವಿಘ್ನದಂತಾಯಿತು

अप्रागल्भ्य - ಅಚಾತುರ್ಯ

अभिसन्धि - ಅಭಿಪ್ರಾಯ

अभ्यर्णं - ಹತ್ತಿರ

अभ्रङ्कष - ಆಕಾಶವನ್ನು ಮುಟ್ಟುವ

अरण्यानी - ದೊಡ್ಡ ಕಾಡು

अवगुण्ठना - ತಲೆಹೊದ್ದಿಕೆ

अवकर - ಕಸ

अवरोध - ಅಂತಃಪುರ

अवसित - ಮುಗಿದ

अविषायिष्ट - ವಿಷದಂತಾಯಿತು

अहितुण्डिक - ಹಾವುಗಳನ್ನು ಹಿಡಿಯುವವ

आखेट - ಬೇಟೆ

आगः - ತಪ್ಪು

आटीकत - ಹೊಂದಿತು

आढ्य - ಹಣವಂತ

आयोधन - ಯುದ್ಧ

आलि - ಗೆಳತಿ

आवुत्त - ಭಾವ

उत्तमर्ण - ಸಾಲಕೊಡುವವ

उत्कीर्ण - ಕೆತ್ತಲ್ಪಟ್ಟ

उदर्के - ಮುಂದಿನ ಪ್ರಯೋಜನ

उदन्त - ಸಮಾಚಾರ

उदवसित - ಮನೆ

उद्देश - ಪ್ರದೇಶ
उद्विग्न - ಭಯಗೊಂಡ
उद्धृत्य - ಎತ್ತಿ
उन्निद्र - ಅರಳಿದ
उपजाप - ಭೇದೋಪಾಯ
उपयेम - ವಿವಾಹ
उपायन - ಕಾಣಿಕೆ
उपालम्भ - ನಿಂದೆ
एकान्ततः - ಬಹಳವಾಗಿ
औदनिक - ಅಡಿಗೆಯವ
कक्ष - ಕಂಕಳು
कटक - ಸೇನೆಯ ವಾಸಸ್ಥಳ
कर्मकर - ಕೂಲಿಯವ
करेणु - ಹೆಣ್ಣಾನೆ
काकिणी - ಕಾಸು(ಒಂದು ಕವಡಿ)
कापुरुष - ದುಷ್ಟಮನುಷ್ಯ
काष्ठा - ಅತಿಶಯ
किशोर - ಶಿಶು
कीलिका - ಬೀಗದ ಕೈಮೊದಲಾದ್ದು
कुलटा - ವ್ಯಭಿಚಾರಿಣೀ
कुलिश - ವಜ್ರಾಯುಧ
कुसूल - ಕಣಜ
कृशानु - ಬೆಂಕಿ
क्रव्य - ಮಾಂಸ
कोटि - ಪಕ್ಷ
कौशल - ಜಾಣತನ
गणिका - ಸೂಳೆ
गुल्म - ಪೊದೆ
गोमायु - ನರಿ
गोष्ठी - ಸಭೆ
ढौकयसि - ನಡೆಯಿಸುತ್ತೀ
चन्दनचर्चा - ಗಂಧಲೇಪನ
चिकित्सक - ವೈದ್ಯ
जठर - ಹೊಟ್ಟೆ
जनपद - ದೇಶ
जातुचित् - ಒಂದು ಸಲ
जाल - ಕಿಟಿಕಿ
जोषं - ಸುಮ್ಮನೆ
तदात्व - ಆ ಸಮಯ
तपस्विनी - ಶೋಚ್ಯಳಾದ
तमिस्रा - ಕಗ್ಗತ್ತಲೆಯುಳ್ಳ ರಾತ್ರಿ
तल्लज - ಪ್ರಶಸ್ತ
तिरस्करिणी - ಪರದೆ
तृणपूलक - ಹುಲ್ಲಿನ ಸಮೂಹ
त्र्यम्बक - ಶಿವ
दन्तावल - ಆನೆ
दुर्गत - ಬಡವ
दून - ದುಃಖಗೊಂಡ
नागरक - ಪಟ್ಟಣದ ಜಾಣ
नासीर - ಸೇನೆ
निकषोपल - ಒರೆಗಲ್ಲು
निकुञ्ज - ಲತೆಗಳಿಂದ ಮುಚ್ಚಿದ ಸ್ಥಳ

ाकुरुम्ब - ಸಮೂಹ
ागडयित्वा - ಬೇಡಿ ಹಾಕಿ
ाबाहुयुद्ध - ಬಾಹುಯುದ್ಧ
ाविंशन् - ಅನುಭವಿಸುವ
निशाम्य - ನೋಡಿ
निश्चिकाय - ನಿರ್ಣಯಿಸಿದನು
निशीथ - ಅರ್ಧರಾತ್ರಿ
ादीयसः - ಅತಿಸವಿಾಪದ
ाश्वास्य - ಸಿಂಹ
ातङ्ग - ಸೂರ್ಯ
ारिरब्धुं - ಆಲಿಂಗಿಸುವುದಕ್ಕೆ
ारिसर - ಹತ್ತಿರದ ಸ್ಥಳ
ार्यवेषयन् - ಬಡಿಸಿದರು
ारिपन्थी - ಶತ್ರುವು
ालितम्भावुक - ನರತುಹೋದ
ाटच्चर - ಕಳ್ಳ
ाणिपीडन - ವಿವಾಹ
ाथोनिधि - ಸಮುದ್ರ
ुलकितकाय - ರೋಮಾಂಚಗೊಂಡ ದೇಹವುಳ್ಳ
पिशुन - ಚಾಡಿಹೇಳುವವ
प्रगे - ಬೆಳಗ್ಗೆ
पूतिगन्धि - ಕೆಟ್ಟವಾಸನೆಯುಳ್ಳ
पूर्वेद्युः - ನಿನ್ನೆ
प्रतिपालयति - ನಿರೀಕ್ಷಿಸುತ್ತಾನೆ
प्रत्यय - ನಂಬಿಕೆ
प्रत्युप्त - ಕೆತ್ತಲ್ಪಟ್ಟ
प्रसून - ಹೂವು
प्राड्विवाक - ನ್ಯಾಯಾಧಿಪತಿ
प्रातिवेशिक - ನೆರಮನೆಯವ
फलक - ಹಲಿಗೆ
बदर - ಬೋರೆಹಣ್ಣು
बाढं - ಅತಿಶಯ
बाहीक - ಹೊರಗಿನ
बाहुज - ಕ್ಷತ್ರಿಯ
बृंहित - ಆನೆಯ ಗರ್ಜನೆ
भागिनेय - ಸಹೋದರಿಯ ಮಗ
भागधेय - ಅದೃಷ್ಟ
भूतार्थ - ಸತ್ಯವಾದ ವಿಷಯ
भूदेव - ಬ್ರಾಹ್ಮಣ
भूमिका - ವೇಷ
भृति - ಸಂಬಳ
भृशं - ಬಹಳ
मर्म - ರಹಸ್ಯವಿಷಯ
मलिम्लुच - ಕಳ್ಳ
माकीं - ಸುಮಾರು
मागध - ಸ್ತುತಿಮಾಡುವವ
मातरिश्वशिशु - ಮುಂದಮಾರುತ
मिष - ನೆಪ
मुनिपुङ्गव - ಋಷಿಶ್ರೇಷ್ಠ
मृगया - ಬೇಟೆ
मृगाङ्क - ಚಂದ್ರ

मृणाल - ತಾವರೆದಂಟು
यामिक - ಪಹರೆಯವ
यूथप - ಸಲಗ
राङ्कव - ಶಾಲು
राजन्य - ಕ್ಷತ್ರಿಯ
राज्यरमा - ರಾಜ್ಯಲಕ್ಷ್ಮೀ
रिक्थ - ದ್ರವ್ಯ
लक्ष्य - ಗುರಿ
लोलुभ - ಅತ್ಯಾಶೆಯುಳ್ಳ
वयस्य - ಸ್ನೇಹಿತ
वराकी - ಶೋಚ್ಯಳಾದ
वामा - ವಿರುದ್ಧಳು
वाहिनीपति - ಸಮುದ್ರ
व्यानशे - ಹರಡಿತು
व्यालग्राही - ಹಾವನ್ನು ಹಿಡಿಯುವವ
विजिगीषु - ಜಯಿಸಲಪೇಕ್ಷೆಯುಳ್ಳವ
विपश्चित् - ಪಂಡಿತ
विविक्त - ಜನರಿಲ್ಲದ ಸ್ಥಳ
विवाहक्षण - ವಿವಾಹೋತ್ಸವ
विशांपति - ರಾಜ
वेतन - ಸಂಬಳ
वेदिका - ಜಗುಲಿ
वेश्म - ಮನೆ
वैणिक - ವೀಣೆಯವ
वैनतेय - ಗರುಡ
शरण - ರಕ್ಷಣೆ
शस्य - ಶ್ಲಾಘ್ಯ
शास्तु - ಕಾಪಾಡಲಿ
शिबिर - ಸೇನೆ ನಿಂತಿರುವ ಸ್ಥಳ
शिरीष - ಬಾಗೇ ಹೂವು
शेमुषी - ಬುದ್ಧಿ
शैलूष - ನಟ
श्रेष्ठि - ಶೆಟ್ಟಿ
षण्ड - ನಪುಂಸಕ
सदागति - ಗಾಳಿ
सपत्न - ಶತ್ರು
सरणि - ದಾರಿ
संवृतपत्र - ಗುಪ್ತಕಾಗದ
स्थविर - ಮುದುಕ
स्रष्टा - ಬ್ರಹ್ಮನು
स्वच्छन्द - ಸ್ವತಂತ್ರ
साङ्क्रामिक - ಅಂಟುವ
साध्वस - ಭಯ
साध्वी - ಪತಿವ್ರತೆ
स्नुहि - ಕಳ್ಳಿ
हर्म्य - ಹಣವಂತರ ಮನೆ

शोधनपत्रिका

पृष्ठे	पङ्क्तौ	अशुद्धम्	शुद्धम्
३	६	सौष्टवं	सौष्ठवं
,,	१३	भामिनी	अङ्गना
४	१	,,	रमणी
५	१७	प्रियसखी	भर्तृदारिका
६	८—९	प्रेषयित्वा	प्रेष्य
,,	१७	शरीरान्तरे	शरीरान्तः
,,	२४	त्तदवस्थामवलोकनेन	त्तदवस्थावलोकनेन
७	१७	व्याधिः	आधिः
८	७	विरोढो	विरूढो
२	२०	र्धेयण	र्धैर्येण
३	१	सखिभ्यः	सखीभ्यः
५	२	पश्यमा	पश्याम
६	१०	विदर्भां	विदर्भान्
७	१६	न लभतां	मा लभतां
,,	२१	प्रतिश्रुतः	प्रतिश्रुतः
,,	,,	कन्यर्थिनौ	कन्यार्थिनौ
२१	२	निर्वर्तन	निवर्तन
२३	३	निर्बध्यमानो	प्रार्थ्यमानो
२४	१४	शृण्वन्ती	शृण्वती
२६	१९	वेदाध्यन	वेदाध्ययन
२७	५	स्त्विम	स्त्वेन
,,	१९	रितेऽवर्तेतां	रिते अवर्तेतां

पार्श्वे	पङ्क्तौ	अशुद्धम्	शुद्धम्
२८	६	हन्ययममात्यस्य	हन्यमात्यस्य
,,	९	सौदमनीं	सौदामनीं
,,	२०	विलिखितु	विलेखितु
३२	७	हितेऽपि त्वमेव शरण	हितेऽपि शरण
,,	२०	दुत्तमार्णात्	दुत्तमर्णात्
३३	२	शिक्षानिर्वेश	दण्डानुभवं
,,	१९	भवितव्यं च	भवितव्यश्च
,,	२२	शिक्षणात्	दण्डनात्
३६	२३	पुरस्तात्	परस्तात्
३७	९	शकटं	स्यन्दनं
३८	६	स	स पुरुषः
,,	२४	प्रसूनैस्व	प्रसूनैस्स्व
४१	५	निर्वर्तयेदिति	निर्वर्तनीयमिति
,,	२०	प्रकृतयोऽम्बु	सभ्या अम्बु
४२	१०	गृहीताः	गृहीत्वा
,,	१२	प्लवेते	निमज्जतः
४३	३	सङ्कोचयित्वा	सङ्कोच्या
,,	,,	स्त्वद्यैव	स्त्वयमेव
,,	५	वितरन्निव	आप्नुवन्निव
४५	१	रन्ध्रान्वेषिणी	समयं निरीक्षमाणा
,,	१०	अनुतस्थौ	अनुतष्ठौ
,,	४	स्वनित्यं कर्म	स्वधर्मं
,,	९	शस्यः	शस्यैः

ಪುಸ್ತಕ ಸಂಖ್ಯೆ P 2433

